# Bhagavad-Gita

## Large-Print Edition

धृतराष्ट्र उवाच ।
धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः ।
मामकाः पाण्डवाश्चैव किमकुर्वत संजय ॥ १-१ ॥

dhṛtarāṣṭra uvāca |
dharmakṣetre kurukṣetre samavetā yuyutsavaḥ |
māmakāḥ pāṇḍavāś caiva kim akurvata saṃjaya ||1-1||

संजय उवाच ।
दृष्ट्वा तु पाण्डवानीकं व्यूढं दुर्योधनस्तदा ।
आचार्यमुपसंगम्य राजा वचनमब्रवीत् ॥ १-२ ॥

saṃjaya uvāca |
dṛṣṭvā tu pāṇḍavānīkaṃ vyūḍhaṃ duryodhanas tadā |
ācāryam upasaṃgamya rājā vacanam abravīt ||1-2||

पश्यैतां पाण्डुपुत्राणामाचार्य महतीं चमूम् ।
व्यूढां द्रुपदपुत्रेण तव शिष्येण धीमता ॥ १-३ ॥

paśyaitāṃ pāṇḍuputrāṇām ācārya mahatīṃ camūm |
vyūḍhāṃ drupadaputreṇa tava śiṣyeṇa dhīmatā ||1-3||

अत्र शूरा महेष्वासा भीमार्जुनसमा युधि ।
युयुधानो विराटश्च द्रुपदश्च महारथः ॥ १-४ ॥

atra śūrā maheṣvāsā bhīmārjunasamā yudhi |
yuyudhāno virāṭaś ca drupadaś ca mahārathaḥ ||1-4||

धृष्टकेतुश्चेकितानः काशिराजश्च वीर्यवान् ।
पुरुजित्कुन्तिभोजश्च शैब्यश्च नरपुंगवः ॥ १-५ ॥

dhṛṣṭaketuś cekitānaḥ kāśirājaś ca vīryavān |
purujit kuntibhojaś ca śaibyaś ca narapuṃgavaḥ ||1-5||



युधामन्युश्च विक्रान्त उत्तमौजाश्च वीर्यवान् ।
सौभद्रो द्रौपदेयाश्च सर्व एव महारथाः ॥ १-६ ॥

yudhāmanyuś ca vikrānta uttamaujāś ca vīryavān |
saubhadro draupadeyāś ca sarva eva mahārathāḥ ||1-6||

अस्माकं तु विशिष्टा ये तान्निबोध द्विजोत्तम ।
नायका मम सैन्यस्य संज्ञार्थं तान्ब्रवीमि ते ॥ १-७ ॥

asmākaṃ tu viśiṣṭā ye tān nibodha dvijottama |
nāyakā mama sainyasya saṃjñārthaṃ tān bravīmi te ||1-7||

भवान्भीष्मश्च कर्णश्च कृपश्च समितिंजयः ।
अश्वत्थामा विकर्णश्च सौमदत्तिस्तथैव च ॥ १-८ ॥

bhavān bhīṣmaś ca karṇaś ca kṛpaś ca samitiṃjayaḥ |
aśvatthāmā vikarṇaś ca saumadattis tathaiva ca ||1-8||

अन्ये च बहवः शूरा मदर्थे त्यक्तजीविताः ।
नानाशस्त्रप्रहरणाः सर्वे युद्धविशारदाः ॥ १-९ ॥

anye ca bahavaḥ śūrā madarthe tyaktajīvitāḥ |
nānāśastrapraharaṇāḥ sarve yuddhaviśāradāḥ ||1-9||

अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितम् ।
पर्याप्तं त्विदमेतेषां बलं भीमाभिरक्षितम् ॥ १-१० ॥

aparyāptaṃ tad asmākaṃ balaṃ bhīṣmābhirakṣitam |
paryāptaṃ tv idam eteṣāṃ balaṃ bhīmābhirakṣitam ||1-10||

अयनेषु च सर्वेषु यथाभागमवस्थिताः ।
भीष्ममेवाभिरक्षन्तु भवन्तः सर्व एव हि ॥ १-११ ॥

ayaneṣu ca sarveṣu yathābhāgam avasthitāḥ |
bhīṣmam evābhirakṣantu bhavantaḥ sarva eva hi ||1-11||

तस्य संजनयन्हर्षं कुरुवृद्धः पितामहः ।
सिंहनादं विनद्योच्चैः शङ्खं दध्मौ प्रतापवान् ॥ १-१२ ॥

tasya saṃjanayan harṣaṃ kuruvṛddhaḥ pitāmahaḥ |
siṃhanādaṃ vinadyoccaiḥ śaṅkhaṃ dadhmau pratāpavān ||1-12||

ततः शङ्खाश्च भेर्यश्च पणवानकगोमुखाः ।
सहसैवाभ्यहन्यन्त स शब्दस्तुमुलो ऽभवत् ॥१-१३॥

tataḥ śaṅkhāś ca bheryaś ca paṇavānakagomukhāḥ ǀ
sahasaivābhyahanyanta sa śabdas tumulo 'bhavat ǁ1-13ǁ

ततः श्वेतैर्हयैर्युक्ते महति स्यन्दने स्थितौ ।
माधवः पाण्डवश्चैव दिव्यौ शङ्खौ प्रदध्मतुः ॥१-१४॥

tataḥ śvetair hayair yukte mahati syandane sthitau ǀ
mādhavaḥ pāṇḍavaś caiva divyau śaṅkhau pradadhmatuḥ ǁ1-14ǁ

पाञ्चजन्यं हृषीकेशो देवदत्तं धनंजयः ।
पौण्ड्रं दध्मौ महाशङ्खं भीमकर्मा वृकोदरः ॥१-१५॥

pāñcajanyaṃ hṛṣīkeśo devadattaṃ dhanaṃjayaḥ ǀ
pauṇḍraṃ dadhmau mahāśaṅkhaṃ bhīmakarmā vṛkodaraḥ ǁ1-15ǁ

अनन्तविजयं राजा कुन्तीपुत्रो युधिष्ठिरः ।
नकुलः सहदेवश्च सुघोषमणिपुष्पकौ ॥१-१६॥

anantavijayaṃ rājā kuntīputro yudhiṣṭhiraḥ ǀ
nakulaḥ sahadevaś ca sughoṣamaṇipuṣpakau ǁ1-16ǁ

काश्यश्च परमेष्वासः शिखण्डी च महारथः ।
धृष्टद्युम्नो विराटश्च सात्यकिश्चापराजितः ॥१-१७॥

kāśyaś ca parameṣvāsaḥ śikhaṇḍī ca mahārathaḥ ǀ
dhṛṣṭadyumno virāṭaś ca sātyakiś cāparājitaḥ ǁ1-17ǁ

द्रुपदो द्रौपदेयाश्च सर्वशः पृथिवीपते ।
सौभद्रश्च महाबाहुः शङ्खान्दध्मुः पृथक्पृथक् ॥१-१८॥

drupado draupadeyāś ca sarvaśaḥ pṛthivīpate ǀ
saubhadraś ca mahābāhuḥ śaṅkhān dadhmuḥ pṛthak pṛthak ǁ1-18ǁ

स घोषो धार्तराष्ट्राणां हृदयानि व्यदारयत् ।
नभश्च पृथिवीं चैव तुमुलो व्यनुनादयन् ॥१-१९॥

sa ghoṣo dhārtarāṣṭrāṇāṃ hṛdayāni vyadārayat ǀ
nabhaś ca pṛthivīṃ caiva tumulo vyanunādayan ǁ1-19ǁ



अथ व्यवस्थितान्दृष्ट्वा धार्तराष्ट्रान्कपिध्वजः ।
प्रवृत्ते शस्त्रसंपाते धनुरुद्यम्य पाण्डवः ॥१-२०॥

atha vyavasthitān dṛṣṭvā dhārtarāṣṭrān kapidhvajaḥ ǀ
pravṛtte śastrasaṃpāte dhanur udyamya pāṇḍavaḥ ǁ1-20ǁ

हृषीकेशं तदा वाक्यमिदमाह महीपते ।
सेनयोरुभयोर्मध्ये रथं स्थापय मे ऽच्युत ॥१-२१॥

hṛṣīkeśaṃ tadā vākyam idam āha mahīpate ǀ
senayor ubhayor madhye rathaṃ sthāpaya me 'cyuta ǁ1-21ǁ

यावदेतान्निरीक्षे ऽहं योद्धुकामानवस्थितान् ।
कैर्मया सह योद्धव्यमस्मिन्रणसमुद्यमे ॥१-२२॥

yāvad etān nirīkṣe 'haṃ yoddhukāmān avasthitān ǀ
kair mayā saha yoddhavyam asmin raṇasamudyame ǁ1-22ǁ

योत्स्यमानानवेक्षे ऽहं य एते ऽत्र समागताः ।
धार्तराष्ट्रस्य दुर्बुद्धेर्युद्धे प्रियचिकीर्षवः ॥१-२३॥

yotsyamānān avekṣe 'haṃ ya ete 'tra samāgatāḥ ǀ
dhārtarāṣṭrasya durbuddher yuddhe priyacikīrṣavaḥ ǁ1-23ǁ

एवमुक्तो हृषीकेशो गुडाकेशेन भारत ।
सेनयोरुभयोर्मध्ये स्थापयित्वा रथोत्तमम् ॥१-२४॥

evam ukto hṛṣīkeśo guḍākeśena bhārata ǀ
senayor ubhayor madhye sthāpayitvā rathottamam ǁ1-24ǁ

भीष्मद्रोणप्रमुखतः सर्वेषां च महीक्षिताम् ।
उवाच पार्थ पश्यैतान्समवेतान्कुरूनिति ॥१-२५॥

bhīṣmadroṇapramukhataḥ sarveṣāṃ ca mahīkṣitām ǀ
uvāca pārtha paśyaitān samavetān kurūn iti ǁ1-25ǁ

तत्रापश्यत्स्थितान्पार्थः पितॄनथ पितामहान् ।
आचार्यान्मातुलान्भ्रातॄन्पुत्रान्पौत्रान्सखींस्तथा ॥१-२६॥

tatrāpaśyat sthitān pārthaḥ pitṝn atha pitāmahān ǀ
ācāryān mātulān bhrātṝn putrān pautrān sakhīṃs tathā ǁ1-26ǁ

श्वशुरान्सुहृदश्चैव सेनयोरुभयोरपि ।
तान्समीक्ष्य स कौन्तेयः सर्वान्बन्धूनवस्थितान् ॥१-२७॥

śvaśurān suhṛdaś caiva senayor ubhayor api |
tān samīkṣya sa kaunteyaḥ sarvān bandhūn avasthitān ||1-27||

कृपया परयाविष्टो विषीदन्निदमब्रवीत् ।
दृष्ट्वेमान्स्वजनान्कृष्ण युयुत्सून्समवस्थितान् ॥१-२८॥

kṛpayā parayāviṣṭo viṣīdann idam abravīt |
dṛṣṭvemān svajanān kṛṣṇa yuyutsūn samavasthitān ||1-28||

सीदन्ति मम गात्राणि मुखं च परिशुष्यति ।
वेपथुश्च शरीरे मे रोमहर्षश्च जायते ॥१-२९॥

sīdanti mama gātrāṇi mukhaṃ ca pariśuṣyati |
vepathuś ca śarīre me romaharṣaś ca jāyate ||1-29||

गाण्डीवं स्रंसते हस्तात्त्वक्चैव परिदह्यते ।
न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः ॥१-३०॥

gāṇḍīvaṃ sraṃsate hastāt tvak caiva paridahyate |
na ca śaknomy avasthātuṃ bhramatīva ca me manaḥ ||1-30||

निमित्तानि च पश्यामि विपरीतानि केशव ।
न च श्रेयो ऽनुपश्यामि हत्वा स्वजनमाहवे ॥१-३१॥

nimittāni ca paśyāmi viparītāni keśava |
na ca śreyo 'nupaśyāmi hatvā svajanam āhave ||1-31||

न काङ्क्षे विजयं कृष्ण न च राज्यं सुखानि च ।
किं नो राज्येन गोविन्द किं भोगैर्जीवितेन वा ॥१-३२॥

na kāṅkṣe vijayaṃ kṛṣṇa na ca rājyaṃ sukhāni ca |
kiṃ no rājyena govinda kiṃ bhogair jīvitena vā ||1-32||

येषामर्थे काङ्क्षितं नो राज्यं भोगाः सुखानि च ।
त इमे ऽवस्थिता युद्धे प्राणांस्त्यक्त्वा धनानि च ॥१-३३॥

yeṣām arthe kāṅkṣitaṃ no rājyaṃ bhogāḥ sukhāni ca |
ta ime 'vasthitā yuddhe prāṇāṃs tyaktvā dhanāni ca ||1-33||



आचार्याः पितरः पुत्रास्तथैव च पितामहाः ।
मातुलाः श्वशुराः पौत्राः स्यालाः संबन्धिनस्तथा ॥१-३४॥

ācāryāḥ pitaraḥ putrās tathaiva ca pitāmahāḥ |
mātulāḥ śvaśurāḥ pautrāḥ syālāḥ saṃbandhinas tathā ||1-34||

एतान्न हन्तुमिच्छामि घ्नतो ऽपि मधुसूदन ।
अपि त्रैलोक्यराज्यस्य हेतोः किं नु महीकृते ॥१-३५॥

etān na hantum icchāmi ghnato 'pi madhusūdana |
api trailokyarājyasya hetoḥ kiṃ nu mahīkṛte ||1-35||

निहत्य धार्तराष्ट्रान्नः का प्रीतिः स्याज्जनार्दन ।
पापमेवाश्रयेदस्मान्हत्वैतानाततायिनः ॥१-३६॥

nihatya dhārtarāṣṭrān naḥ kā prītiḥ syāj janārdana |
pāpam evāśrayed asmān hatvaitān ātatāyinaḥ ||1-36||

तस्मान्नार्हा वयं हन्तुं धार्तराष्ट्रान्सबान्धवान् ।
स्वजनं हि कथं हत्वा सुखिनः स्याम माधव ॥१-३७॥

tasmān nārhā vayaṃ hantuṃ dhārtarāṣṭrān sabāndhavān |
svajanaṃ hi kathaṃ hatvā sukhinaḥ syāma mādhava ||1-37||

यद्यप्येते न पश्यन्ति लोभोपहतचेतसः ।
कुलक्षयकृतं दोषं मित्रद्रोहे च पातकम् ॥१-३८॥

yady apy ete na paśyanti lobhopahatacetasaḥ |
kulakṣayakṛtaṃ doṣaṃ mitradrohe ca pātakam ||1-38||

कथं न ज्ञेयमस्माभिः पापादस्मान्निवर्तितुम् ।
कुलक्षयकृतं दोषं प्रपश्यद्भिर्जनार्दन ॥१-३९॥

kathaṃ na jñeyam asmābhiḥ pāpād asmān nivartitum |
kulakṣayakṛtaṃ doṣaṃ prapaśyadbhir janārdana ||1-39||

कुलक्षये प्रणश्यन्ति कुलधर्माः सनातनाः ।
धर्मे नष्टे कुलं कृत्स्नमधर्मो ऽभिभवत्युत ॥१-४०॥

kulakṣaye praṇaśyanti kuladharmāḥ sanātanāḥ |
dharme naṣṭe kulaṃ kṛtsnam adharmo 'bhibhavaty uta ||1-40||

अधर्माभिभवात्कृष्ण प्रदुष्यन्ति कुलस्त्रियः ।
स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसंकरः ॥१-४१॥

adharmābhibhavāt kṛṣṇa praduṣyanti kulastriyaḥ |
strīṣu duṣṭāsu vārṣṇeya jāyate varṇasaṃkaraḥ ||1-41||

संकरो नरकायैव कुलघ्नानां कुलस्य च ।
पतन्ति पितरो ह्येषां लुप्तपिण्डोदकक्रियाः ॥१-४२॥

saṃkaro narakāyaiva kulaghnānāṃ kulasya ca |
patanti pitaro hy eṣāṃ luptapiṇḍodakakriyāḥ ||1-42||

दोषैरेतैः कुलघ्नानां वर्णसंकरकारकैः ।
उत्साद्यन्ते जातिधर्माः कुलधर्माश्च शाश्वताः ॥१-४३॥

doṣair etaiḥ kulaghnānāṃ varṇasaṃkarakārakaiḥ |
utsādyante jātidharmāḥ kuladharmāś ca śāśvatāḥ ||1-43||

उत्सन्नकुलधर्माणां मनुष्याणां जनार्दन ।
नरके नियतं वासो भवतीत्यनुशुश्रुम ॥१-४४॥

utsannakuladharmāṇāṃ manuṣyāṇāṃ janārdana |
narake niyataṃ vāso bhavatīty anuśuśruma ||1-44||

अहो बत महत्पापं कर्तुं व्यवसिता वयम् ।
यद्राज्यसुखलोभेन हन्तुं स्वजनमुद्यताः ॥१-४५॥

aho bata mahat pāpaṃ kartuṃ vyavasitā vayam |
yad rājyasukhalobhena hantuṃ svajanam udyatāḥ ||1-45||

यदि मामप्रतीकारमशस्त्रं शस्त्रपाणयः ।
धार्तराष्ट्रा रणे हन्युस्तन्मे क्षेमतरं भवेत् ॥१-४६॥

yadi mām apratīkāram aśastraṃ śastrapāṇayaḥ |
dhārtarāṣṭrā raṇe hanyus tan me kṣemataraṃ bhavet ||1-46||

एवमुक्त्वार्जुनः संख्ये रथोपस्थ उपाविशत् ।
विसृज्य सशरं चापं शोकसंविग्नमानसः ॥१-४७॥

evam uktvārjunaḥ saṃkhye rathopastha upāviśat |
visṛjya saśaraṃ cāpaṃ śokasaṃvignamānasaḥ ||1-47||



संजय उवाच ।
तं तथा कृपयाविष्टमश्रुपूर्णाकुलेक्षणम् ।
विषीदन्तमिदं वाक्यमुवाच मधुसूदनः ॥२-१॥

saṃjaya uvāca |
taṃ tathā kṛpayāviṣṭam aśrupūrṇākulekṣaṇam |
viṣīdantam idaṃ vākyam uvāca madhusūdanaḥ ||2-1||

श्रीभगवानुवाच ।
कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम् ।
अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन ॥२-२॥

śrībhagavān uvāca |
kutas tvā kaśmalam idaṃ viṣame samupasthitam |
anāryajuṣṭam asvargyam akīrtikaram arjuna ||2-2||

क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते ।
क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परंतप ॥२-३॥

klaibyaṃ mā sma gamaḥ pārtha naitat tvayy upapadyate |
kṣudraṃ hṛdayadaurbalyaṃ tyaktvottiṣṭha paraṃtapa ||2-3||

अर्जुन उवाच ।
कथं भीष्ममहं संख्ये द्रोणं च मधुसूदन ।
इषुभिः प्रतियोत्स्यामि पूजार्हावरिसूदन ॥२-४॥

arjuna uvāca |
kathaṃ bhīṣmam ahaṃ saṃkhye droṇaṃ ca madhusūdana |
iṣubhiḥ pratiyotsyāmi pūjārhāv arisūdana ||2-4||

गुरूनहत्वा हि महानुभावान्
श्रेयो भोक्तुं भैक्ष्यमपीह लोके ।
हत्वार्थकामांस्तु गुरूनिहैव
भुञ्जीय भोगान्रुधिरप्रदिग्धान् ॥२-५॥

gurūn ahatvā hi mahānubhāvāñ; śreyo bhoktuṃ bhaikṣam apīha loke |
hatvārthakāmāṃs tu gurūn ihaiva; bhuñjīya bhogān rudhirapradigdhān ||2-5||

न चैतद्विद्मः कतरन्नो गरीयो
यद्वा जयेम यदि वा नो जयेयुः ।
यानेव हत्वा न जिजीविषामस्
ते ऽवस्थिताः प्रमुखे धार्तराष्ट्राः ॥२-६॥

na caitad vidmaḥ kataran no garīyo; yad vā jayema yadi vā no jayeyuḥ |
yān eva hatvā na jijīviṣāmas; te 'vasthitāḥ pramukhe dhārtarāṣṭrāḥ ||2-6||

कार्पण्यदोषोपहतस्वभावः
पृच्छामि त्वां धर्मसंमूढचेताः ।
यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे
शिष्यस्ते ऽहं शाधि मां त्वां प्रपन्नम् ॥२-७॥

kārpaṇyadoṣopahatasvabhāvaḥ; pṛcchāmi tvāṃ dharmasammūḍhacetāḥ |
yac chreyaḥ syān niścitaṃ brūhi tan me; śiṣyas te 'haṃ śādhi māṃ tvāṃ prapannam ||2-7||

न हि प्रपश्यामि ममापनुद्याद्
यच्छोकमुच्छोषणमिन्द्रियाणाम् ।
अवाप्य भूमावसपत्नमृद्धं
राज्यं सुराणामपि चाधिपत्यम् ॥२-८॥

na hi prapaśyāmi mamāpanudyād; yac chokam ucchoṣaṇam indriyāṇām |
avāpya bhūmāv asapatnam ṛddhaṃ; rājyaṃ surāṇām api cādhipatyam ||2-8||

संजय उवाच ।
एवमुक्त्वा हृषीकेशं गुडाकेशः परंतप ।
न योत्स्य इति गोविन्दमुक्त्वा तूष्णीं बभूव ह ॥२-९॥

saṃjaya uvāca |
evam uktvā hṛṣīkeśaṃ guḍākeśaḥ paraṃtapa |
na yotsya iti govindam uktvā tūṣṇīṃ babhūva ha ||2-9||

तमुवाच हृषीकेशः प्रहसन्निव भारत ।
सेनयोरुभयोर्मध्ये विषीदन्तमिदं वचः ॥२-१०॥

tam uvāca hṛṣīkeśaḥ prahasann iva bhārata |
senayor ubhayor madhye viṣīdantam idaṃ vacaḥ ||2-10||



श्रीभगवानुवाच ।
अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे ।
गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः ॥२-११॥

śrībhagavān uvāca |
aśocyān anvaśocas tvaṃ prajñāvādāṃś ca bhāṣase |
gatāsūn agatāsūṃś ca nānuśocanti paṇḍitāḥ ||2-11||

न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः ।
न चैव न भविष्यामः सर्वे वयमतः परम् ॥२-१२॥

na tv evāhaṃ jātu nāsaṃ na tvaṃ neme janādhipāḥ |
na caiva na bhaviṣyāmaḥ sarve vayam ataḥ param ||2-12||

देहिनो ऽस्मिन्यथा देहे कौमारं यौवनं जरा ।
तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति ॥२-१३॥

dehino 'smin yathā dehe kaumāraṃ yauvanaṃ jarā |
tathā dehāntaraprāptir dhīras tatra na muhyati ||2-13||

मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः ।
आगमापायिनो ऽनित्यास्तांस्तितिक्षस्व भारत ॥२-१४॥

mātrāsparśās tu kaunteya śītoṣṇasukhaduḥkhadāḥ |
āgamāpāyino 'nityās tāṃs titikṣasva bhārata ||2-14||

यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ ।
समदुःखसुखं धीरं सो ऽमृतत्वाय कल्पते ॥२-१५॥

yaṃ hi na vyathayanty ete puruṣaṃ puruṣarṣabha |
samaduḥkhasukhaṃ dhīraṃ so 'mṛtatvāya kalpate ||2-15||

नासतो विद्यते भावो नाभावो विद्यते सतः ।
उभयोरपि दृष्टो ऽन्तस्त्वनयोस्तत्त्वदर्शिभिः ॥२-१६॥

nāsato vidyate bhāvo nābhāvo vidyate sataḥ |
ubhayor api dṛṣṭo 'ntas tv anayos tattvadarśibhiḥ ||2-16||

अविनाशि तु तद्विद्धि येन सर्वमिदं ततम् ।
विनाशमव्ययस्यास्य न कश्चित्कर्तुमर्हति ॥२-१७॥

avināśi tu tad viddhi yena sarvam idaṃ tatam |
vināśam avyayasyāsya na kaś cit kartum arhati ||2-17||

अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः ।
अनाशिनो ऽप्रमेयस्य तस्माद्युध्यस्व भारत ॥२-१८॥

antavanta ime dehā nityasyoktāḥ śarīriṇaḥ |
anāśino 'prameyasya tasmād yudhyasva bhārata ||2-18||

य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम् ।
उभौ तौ न विजानीतो नायं हन्ति न हन्यते ॥२-१९॥

ya enaṃ vetti hantāraṃ yaś cainaṃ manyate hatam |
ubhau tau na vijānīto nāyaṃ hanti na hanyate ||2-19||

न जायते म्रियते वा कदा चिन्
नायं भूत्वा भविता वा न भूयः ।
अजो नित्यः शाश्वतो ऽयं पुराणो
न हन्यते हन्यमाने शरीरे ॥२-२०॥

na jāyate mriyate vā kadā cin; nāyaṃ bhūtvā bhavitā vā na bhūyaḥ |
ajo nityaḥ śāśvato 'yaṃ purāṇo; na hanyate hanyamāne śarīre ||2-20||

वेदाविनाशिनं नित्यं य एनमजमव्ययम् ।
कथं स पुरुषः पार्थ कं घातयति हन्ति कम् ॥२-२१॥

vedāvināśinaṃ nityaṃ ya enam ajam avyayam |
kathaṃ sa puruṣaḥ pārtha kaṃ ghātayati hanti kam ||2-21||

वासांसि जीर्णानि यथा विहाय
नवानि गृह्णाति नरो ऽपराणि ।
तथा शरीराणि विहाय जीर्णान्य्
अन्यानि संयाति नवानि देही ॥२-२२॥

vāsāṃsi jīrṇāni yathā vihāya; navāni gṛhṇāti naro 'parāṇi |
tathā śarīrāṇi vihāya jīrṇāny; anyāni saṃyāti navāni dehī ||2-22||

नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः ।
न चैनं क्लेदयन्त्यापो न शोषयति मारुतः ॥२-२३॥

nainaṃ chindanti śastrāṇi nainaṃ dahati pāvakaḥ |
na cainaṃ kledayanty āpo na śoṣayati mārutaḥ ||2-23||



अच्छेद्यो ऽयमदाह्यो ऽयमक्लेद्यो ऽशोष्य एव च ।
नित्यः सर्वगतः स्थाणुरचलो ऽयं सनातनः ॥२-२४॥

acchedyo 'yam adāhyo 'yam akledyo 'śoṣya eva ca |
nityaḥ sarvagataḥ sthāṇur acalo 'yaṃ sanātanaḥ ||2-24||

अव्यक्तो ऽयमचिन्त्यो ऽयमविकार्यो ऽयमुच्यते ।
तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि ॥२-२५॥

avyakto 'yam acintyo 'yam avikāryo 'yam ucyate |
tasmād evaṃ viditvainaṃ nānuśocitum arhasi ||2-25||

अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतम् ।
तथापि त्वं महाबाहो नैनं शोचितुमर्हसि ॥२-२६॥

atha cainaṃ nityajātaṃ nityaṃ vā manyase mṛtam |
tathāpi tvaṃ mahābāho nainaṃ śocitum arhasi ||2-26||

जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च ।
तस्मादपरिहार्ये ऽर्थे न त्वं शोचितुमर्हसि ॥२-२७॥

jātasya hi dhruvo mṛtyur dhruvaṃ janma mṛtasya ca |
tasmād aparihārye 'rthe na tvaṃ śocitum arhasi ||2-27||

अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत ।
अव्यक्तनिधनान्येव तत्र का परिदेवना ॥२-२८॥

avyaktādīni bhūtāni vyaktamadhyāni bhārata |
avyaktanidhanāny eva tatra kā paridevanā ||2-28||

आश्चर्यवत्पश्यति कश्चिदेनम्
आश्चर्यवद्वदति तथैव चान्यः ।
आश्चर्यवच्चैनमन्यः शृणोति
श्रुत्वाप्येनं वेद न चैव कश्चित् ॥२-२९॥

āścaryavat paśyati kaś cid enam; āścaryavad vadati tathaiva cānyaḥ |
āścaryavac cainam anyaḥ śṛṇoti; śrutvāpy enaṃ veda na caiva kaś cit ||2-29||

देही नित्यमवध्यो ऽयं देहे सर्वस्य भारत ।
तस्मात्सर्वाणि भूतानि न त्वं शोचितुमर्हसि ॥२-३०॥

dehī nityam avadhyo 'yaṃ dehe sarvasya bhārata |

tasmāt sarvāṇi bhūtāni na tvaṃ śocitum arhasi ||2-30||

स्वधर्ममपि चावेक्ष्य न विकम्पितुमर्हसि ।
धर्म्याद्धि युद्धाच्छ्रेयो ऽन्यत्क्षत्रियस्य न विद्यते ॥२-३१॥

svadharmam api cāvekṣya na vikampitum arhasi |
dharmyād dhi yuddhāc chreyo 'nyat kṣatriyasya na vidyate ||2-31||

यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतम् ।
सुखिनः क्षत्रियाः पार्थ लभन्ते युद्धमीदृशम् ॥२-३२॥

yadṛcchayā copapannaṃ svargadvāram apāvṛtam |
sukhinaḥ kṣatriyāḥ pārtha labhante yuddham īdṛśam ||2-32||

अथ चेत्त्वमिमं धर्म्यं संग्रामं न करिष्यसि ।
ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि ॥२-३३॥

atha cet tvam imaṃ dharmyaṃ saṃgrāmaṃ na kariṣyasi |
tataḥ svadharmaṃ kīrtiṃ ca hitvā pāpam avāpsyasi ||2-33||

अकीर्तिं चापि भूतानि कथयिष्यन्ति ते ऽव्ययाम् ।
संभावितस्य चाकीर्तिर्मरणादतिरिच्यते ॥२-३४॥

akīrtiṃ cāpi bhūtāni kathayiṣyanti te 'vyayām |
saṃbhāvitasya cākīrtir maraṇād atiricyate ||2-34||

भयाद्रणादुपरतं मंस्यन्ते त्वां महारथाः ।
येषां च त्वं बहुमतो भूत्वा यास्यसि लाघवम् ॥२-३५॥

bhayād raṇād uparataṃ maṃsyante tvāṃ mahārathāḥ |
yeṣāṃ ca tvaṃ bahumato bhūtvā yāsyasi lāghavam ||2-35||

अवाच्यवादांश्च बहून्वदिष्यन्ति तवाहिताः ।
निन्दन्तस्तव सामर्थ्यं ततो दुःखतरं नु किम् ॥२-३६॥

avācyavādāṃś ca bahūn vadiṣyanti tavāhitāḥ |
nindantas tava sāmarthyaṃ tato duḥkhataraṃ nu kim ||2-36||

हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम् ।
तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चयः ॥२-३७॥

hato vā prāpsyasi svargaṃ jitvā vā bhokṣyase mahīm |
tasmād uttiṣṭha kaunteya yuddhāya kṛtaniścayaḥ ||2-37||



सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ ।
ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ॥२-३८॥

sukhaduḥkhe same kṛtvā lābhālābhau jayājayau |
tato yuddhāya yujyasva naivaṃ pāpam avāpsyasi ||2-38||

एषा ते ऽभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु ।
बुद्ध्या युक्तो यया पार्थ कर्मबन्धं प्रहास्यसि ॥२-३९॥

eṣā te 'bhihitā sāṃkhye buddhir yoge tv imāṃ śṛṇu |
buddhyā yukto yayā pārtha karmabandhaṃ prahāsyasi ||2-39||

नेहाभिक्रमनाशो ऽस्ति प्रत्यवायो न विद्यते ।
स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ॥२-४०॥

nehābhikramanāśo 'sti pratyavāyo na vidyate |
svalpam apy asya dharmasya trāyate mahato bhayāt ||2-40||

व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन ।
बहुशाखा ह्यनन्ताश्च बुद्धयो ऽव्यवसायिनाम् ॥२-४१॥

vyavasāyātmikā buddhir ekeha kurunandana |
bahuśākhā hy anantāś ca buddhayo 'vyavasāyinām ||2-41||

यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः ।
वेदवादरताः पार्थ नान्यदस्तीति वादिनः ॥२-४२॥

yām imāṃ puṣpitāṃ vācaṃ pravadanty avipaścitaḥ |
vedavādaratāḥ pārtha nānyad astīti vādinaḥ ||2-42||

कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदाम् ।
क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति ॥२-४३॥

kāmātmānaḥ svargaparā janmakarmaphalapradām |
kriyāviśeṣabahulāṃ bhogaiśvaryagatiṃ prati ||2-43||

भोगैश्वर्यप्रसक्तानां तयापहृतचेतसाम् ।
व्यवसायात्मिका बुद्धिः समाधौ न विधीयते ॥२-४४॥

bhogaiśvaryaprasaktānāṃ tayāpahṛtacetasām |
vyavasāyātmikā buddhiḥ samādhau na vidhīyate ||2-44||

त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन ।
निर्द्वंद्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान् ॥२-४५॥

traiguṇyaviṣayā vedā nistraiguṇyo bhavārjuna ।
nirdvaṃdvo nityasattvastho niryogakṣema ātmavān ॥2-45॥

यावानर्थ उदपाने सर्वतः संप्लुतोदके ।
तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ॥२-४६॥

yāvān artha udapāne sarvataḥ saṃplutodake ।
tāvān sarveṣu vedeṣu brāhmaṇasya vijānataḥ ॥2-46॥

कर्मण्येवाधिकारस्ते मा फलेषु कदा चन ।
मा कर्मफलहेतुर्भूर्मा ते सङ्गो ऽस्त्वकर्मणि ॥२-४७॥

karmaṇy evādhikāras te mā phaleṣu kadā cana ।
mā karmaphalahetur bhūr mā te saṅgo 'stv akarmaṇi ॥2-47॥

योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनंजय ।
सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते ॥२-४८॥

yogasthaḥ kuru karmāṇi saṅgaṃ tyaktvā dhanaṃjaya ।
siddhyasiddhyoḥ samo bhūtvā samatvaṃ yoga ucyate ॥2-48॥

दूरेण ह्यवरं कर्म बुद्धियोगाद्धनंजय ।
बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः ॥२-४९॥

dūreṇa hy avaraṃ karma buddhiyogād dhanaṃjaya ।
buddhau śaraṇam anviccha kṛpaṇāḥ phalahetavaḥ ॥2-49॥

बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते ।
तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम् ॥२-५०॥

buddhiyukto jahātīha ubhe sukṛtaduṣkṛte ।
tasmād yogāya yujyasva yogaḥ karmasu kauśalam ॥2-50॥

कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः ।
जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्यनामयम् ॥२-५१॥

karmajaṃ buddhiyuktā hi phalaṃ tyaktvā manīṣiṇaḥ ।
janmabandhavinirmuktāḥ padaṃ gacchanty anāmayam ॥2-51॥



यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति ।
तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च ॥२-५२॥

yadā te mohakalilaṃ buddhir vyatitariṣyati ।
tadā gantāsi nirvedaṃ śrotavyasya śrutasya ca ॥2-52॥

श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला ।
समाधावचला बुद्धिस्तदा योगमवाप्स्यसि ॥२-५३॥

śrutivipratipannā te yadā sthāsyati niścalā ।
samādhāv acalā buddhis tadā yogam avāpsyasi ॥2-53॥

अर्जुन उवाच ।
स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव ।
स्थितधीः किं प्रभाषेत किमासीत व्रजेत किम् ॥२-५४॥

arjuna uvāca ।
sthitaprajñasya kā bhāṣā samādhisthasya keśava ।
sthitadhīḥ kiṃ prabhāṣeta kim āsīta vrajeta kim ॥2-54॥

श्रीभगवानुवाच ।
प्रजहाति यदा कामान्सर्वान्पार्थ मनोगतान् ।
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥२-५५॥

śrībhagavān uvāca ।
prajahāti yadā kāmān sarvān pārtha manogatān ।
ātmany evātmanā tuṣṭaḥ sthitaprajñas tadocyate ॥2-55॥

दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥२-५६॥

duḥkheṣv anudvignamanāḥ sukheṣu vigataspṛhaḥ ।
vītarāgabhayakrodhaḥ sthitadhīr munir ucyate ॥2-56॥

यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभम् ।
नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ॥२-५७॥

yaḥ sarvatrānabhisnehas tat tat prāpya śubhāśubham ।
nābhinandati na dveṣṭi tasya prajñā pratiṣṭhitā ॥2-57॥

यदा संहरते चायं कूर्मो ऽङ्गानीव सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥२-५८॥

yadā saṃharate cāyaṃ kūrmo 'ṅgānīva sarvaśaḥ |
indriyāṇīndriyārthebhyas tasya prajñā pratiṣṭhitā ||2-58||

विषया विनिवर्तन्ते निराहारस्य देहिनः ।
रसवर्जं रसो ऽप्यस्य परं दृष्ट्वा निवर्तते ॥२-५९॥

viṣayā vinivartante nirāhārasya dehinaḥ |
rasavarjaṃ raso 'py asya paraṃ dṛṣṭvā nivartate ||2-59||

यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः ।
इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः ॥२-६०॥

yatato hy api kaunteya puruṣasya vipaścitaḥ |
indriyāṇi pramāthīni haranti prasabhaṃ manaḥ ||2-60||

तानि सर्वाणि संयम्य युक्त आसीत मत्परः ।
वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ॥२-६१॥

tāni sarvāṇi saṃyamya yukta āsīta matparaḥ |
vaśe hi yasyendriyāṇi tasya prajñā pratiṣṭhitā ||2-61||

ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते ।
सङ्गात्संजायते कामः कामात्क्रोधो ऽभिजायते ॥२-६२॥

dhyāyato viṣayān puṃsaḥ saṅgas teṣūpajāyate |
saṅgāt saṃjāyate kāmaḥ kāmāt krodho 'bhijāyate ||2-62||

क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः ।
स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥२-६३॥

krodhād bhavati saṃmohaḥ saṃmohāt smṛtivibhramaḥ |
smṛtibhraṃśād buddhināśo buddhināśāt praṇaśyati ||2-63||

रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन् ।
आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ॥२-६४॥

rāgadveṣaviyuktais tu viṣayān indriyaiś caran |
ātmavaśyair vidheyātmā prasādam adhigacchati ||2-64||



प्रसादे सर्वदुःखानां हानिरस्योपजायते ।
प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ॥२-६५॥

prasāde sarvaduḥkhānāṃ hānir asyopajāyate |
prasannacetaso hy āśu buddhiḥ paryavatiṣṭhate ||2-65||

नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना ।
न चाभावयतः शान्तिरशान्तस्य कुतः सुखम् ॥२-६६॥

nāsti buddhir ayuktasya na cāyuktasya bhāvanā |
na cābhāvayataḥ śāntir aśāntasya kutaḥ sukham ||2-66||

इन्द्रियाणां हि चरतां यन्मनो ऽनुविधीयते ।
तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि ॥२-६७॥

indriyāṇāṃ hi caratāṃ yan mano 'nuvidhīyate |
tad asya harati prajñāṃ vāyur nāvam ivāmbhasi ||2-67||

तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥२-६८॥

tasmād yasya mahābāho nigṛhītāni sarvaśaḥ |
indriyāṇīndriyārthebhyas tasya prajñā pratiṣṭhitā ||2-68||

या निशा सर्वभूतानां तस्यां जागर्ति संयमी ।
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ॥२-६९॥

yā niśā sarvabhūtānāṃ tasyāṃ jāgarti saṃyamī |
yasyāṃ jāgrati bhūtāni sā niśā paśyato muneḥ ||2-69||

आपूर्यमाणमचलप्रतिष्ठं
  समुद्रमापः प्रविशन्ति यद्वत् ।
तद्वत्कामा यं प्रविशन्ति सर्वे
  स शान्तिमाप्नोति न कामकामी ॥२-७०॥

āpūryamāṇam acalapratiṣṭhaṃ; samudram āpaḥ praviśanti yadvat |
tadvat kāmā yaṃ praviśanti sarve; sa śāntim āpnoti na kāmakāmī ||2-70||

विहाय कामान्यः सर्वान्पुमांश्चरति निःस्पृहः ।
निर्ममो निरहंकारः स शान्तिमधिगच्छति ॥२-७१॥

vihāya kāmān yaḥ sarvān pumāṃś carati niḥspṛhaḥ |

nirmamo nirahaṃkāraḥ sa śāntim adhigacchati ||2-71||

एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति ।
स्थित्वास्यामन्तकाले ऽपि ब्रह्मनिर्वाणमृच्छति ॥ २-७२ ॥

eṣā brāhmī sthitiḥ pārtha naināṃ prāpya vimuhyati |
sthitvāsyām antakāle 'pi brahmanirvāṇam ṛcchati ||2-72||

अर्जुन उवाच ।
ज्यायसी चेत्कर्मणस्ते मता बुद्धिर्जनार्दन ।
तत्किं कर्मणि घोरे मां नियोजयसि केशव ॥ ३-१ ॥

arjuna uvāca |
jyāyasī cet karmaṇas te matā buddhir janārdana |
tat kiṃ karmaṇi ghore māṃ niyojayasi keśava ||3-1||

व्यामिश्रेणैव वाक्येन बुद्धिं मोहयसीव मे ।
तदेकं वद निश्चित्य येन श्रेयो ऽहमाप्नुयाम् ॥ ३-२ ॥

vyāmiśreṇaiva vākyena buddhiṃ mohayasīva me |
tad ekaṃ vada niścitya yena śreyo 'ham āpnuyām ||3-2||

श्रीभगवानुवाच ।
लोके ऽस्मिन्द्विविधा निष्ठा पुरा प्रोक्ता मयानघ ।
ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम् ॥ ३-३ ॥

śrībhagavān uvāca |
loke 'smin dvividhā niṣṭhā purā proktā mayānagha |
jñānayogena sāṃkhyānāṃ karmayogena yogināṃ ||3-3||

न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषो ऽश्नुते ।
न च संन्यसनादेव सिद्धिं समधिगच्छति ॥ ३-४ ॥

na karmaṇām anārambhān naiṣkarmyaṃ puruṣo 'śnute |
na ca saṃnyasanād eva siddhiṃ samadhigacchati ||3-4||

न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत् ।
कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ॥ ३-५ ॥

na hi kaś cit kṣaṇam api jātu tiṣṭhaty akarmakṛt |
kāryate hy avaśaḥ karma sarvaḥ prakṛtijair guṇaiḥ ||3-5||



कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन् ।
इन्द्रियार्थान्विमूढात्मा मिथ्याचारः स उच्यते ॥ ३-६ ॥

karmendriyāṇi saṃyamya ya āste manasā smaran |
indriyārthān vimūḍhātmā mithyācāraḥ sa ucyate ||3-6||

यस्त्विन्द्रियाणि मनसा नियम्यारभते ऽर्जुन ।
कर्मेन्द्रियैः कर्मयोगमसक्तः स विशिष्यते ॥ ३-७ ॥

yas tv indriyāṇi manasā niyamyārabhate 'rjuna |
karmendriyaiḥ karmayogam asaktaḥ sa viśiṣyate ||3-7||

नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः ।
शरीरयात्रापि च ते न प्रसिध्येदकर्मणः ॥ ३-८ ॥

niyataṃ kuru karma tvaṃ karma jyāyo hy akarmaṇaḥ |
śarīrayātrāpi ca te na prasidhyed akarmaṇaḥ ||3-8||

यज्ञार्थात्कर्मणो ऽन्यत्र लोको ऽयं कर्मबन्धनः ।
तदर्थं कर्म कौन्तेय मुक्तसङ्गः समाचर ॥ ३-९ ॥

yajñārthāt karmaṇo 'nyatra loko 'yaṃ karmabandhanaḥ |
tadarthaṃ karma kaunteya muktasaṅgaḥ samācara ||3-9||

सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः ।
अनेन प्रसविष्यध्वमेष वो ऽस्त्विष्टकामधुक् ॥ ३-१० ॥

sahayajñāḥ prajāḥ sṛṣṭvā purovāca prajāpatiḥ |
anena prasaviṣyadhvam eṣa vo 'stv iṣṭakāmadhuk ||3-10||

देवान्भावयतानेन ते देवा भावयन्तु वः ।
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ॥ ३-११ ॥

devān bhāvayatānena te devā bhāvayantu vaḥ |
parasparaṃ bhāvayantaḥ śreyaḥ param avāpsyatha ||3-11||

इष्टान्भोगान्हि वो देवा दास्यन्ते यज्ञभाविताः ।
तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः ॥ ३-१२ ॥

iṣṭān bhogān hi vo devā dāsyante yajñabhāvitāḥ |
tair dattān apradāyaibhyo yo bhuṅkte stena eva saḥ ||3-12||

यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः ।
भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात् ॥३-१३॥

yajñaśiṣṭāśinaḥ santo mucyante sarvakilbiṣaiḥ |
bhuñjate te tv aghaṃ pāpā ye pacanty ātmakāraṇāt ||3-13||

अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसंभवः ।
यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः ॥३-१४॥

annād bhavanti bhūtāni parjanyād annasaṃbhavaḥ |
yajñād bhavati parjanyo yajñaḥ karmasamudbhavaḥ ||3-14||

कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम् ।
तस्मात्सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम् ॥३-१५॥

karma brahmodbhavaṃ viddhi brahmākṣarasamudbhavam |
tasmāt sarvagataṃ brahma nityaṃ yajñe pratiṣṭhitam ||3-15||

एवं प्रवर्तितं चक्रं नानुवर्तयतीह यः ।
अघायुरिन्द्रियारामो मोघं पार्थ स जीवति ॥३-१६॥

evaṃ pravartitaṃ cakraṃ nānuvartayatīha yaḥ |
aghāyur indriyārāmo moghaṃ pārtha sa jīvati ||3-16||

यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः ।
आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यते ॥३-१७॥

yas tv ātmaratir eva syād ātmatṛptaś ca mānavaḥ |
ātmany eva ca saṃtuṣṭas tasya kāryaṃ na vidyate ||3-17||

नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन ।
न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः ॥३-१८॥

naiva tasya kṛtenārtho nākṛteneha kaś cana |
na cāsya sarvabhūteṣu kaś cid arthavyapāśrayaḥ ||3-18||

तस्मादसक्तः सततं कार्यं कर्म समाचर ।
असक्तो ह्याचरन्कर्म परमाप्नोति पूरुषः ॥३-१९॥

tasmād asaktaḥ satataṃ kāryaṃ karma samācara |
asakto hy ācaran karma param āpnoti pūruṣaḥ ||3-19||



कर्मणैव हि संसिद्धिमास्थिता जनकादयः ।
लोकसंग्रहमेवापि संपश्यन्कर्तुमर्हसि ॥३-२०॥

karmaṇaiva hi saṃsiddhim āsthitā janakādayaḥ |
lokasaṃgraham evāpi saṃpaśyan kartum arhasi ||3-20||

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥३-२१॥

yad yad ācarati śreṣṭhas tat tad evetaro janaḥ |
sa yat pramāṇaṃ kurute lokas tad anuvartate ||3-21||

न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किं चन ।
नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि ॥३-२२॥

na me pārthāsti kartavyaṃ triṣu lokeṣu kiṃ cana |
nānavāptam avāptavyaṃ varta eva ca karmaṇi ||3-22||

यदि ह्यहं न वर्तेयं जातु कर्मण्यतन्द्रितः ।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥३-२३॥

yadi hy ahaṃ na varteyaṃ jātu karmaṇy atandritaḥ |
mama vartmānuvartante manuṣyāḥ pārtha sarvaśaḥ ||3-23||

उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम् ।
संकरस्य च कर्ता स्यामुपहन्यामिमाः प्रजाः ॥३-२४॥

utsīdeyur ime lokā na kuryāṃ karma ced aham |
saṃkarasya ca kartā syām upahanyām imāḥ prajāḥ ||3-24||

सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत ।
कुर्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसंग्रहम् ॥३-२५॥

saktāḥ karmaṇy avidvāṃso yathā kurvanti bhārata |
kuryād vidvāṃs tathāsaktaś cikīrṣur lokasaṃgraham ||3-25||

न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम् ।
जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन् ॥३-२६॥

na buddhibhedaṃ janayed ajñānāṃ karmasaṅginām |
joṣayet sarvakarmāṇi vidvān yuktaḥ samācaran ||3-26||

प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः ।
अहंकारविमूढात्मा कर्ताहमिति मन्यते ॥३-२७॥

prakṛteḥ kriyamāṇāni guṇaiḥ karmāṇi sarvaśaḥ |
ahaṃkāravimūḍhātmā kartāham iti manyate ||3-27||

तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः ।
गुणा गुणेषु वर्तन्त इति मत्वा न सज्जते ॥३-२८॥

tattvavit tu mahābāho guṇakarmavibhāgayoḥ |
guṇā guṇeṣu vartanta iti matvā na sajjate ||3-28||

प्रकृतेर्गुणसंमूढाः सज्जन्ते गुणकर्मसु ।
तानकृत्स्नविदो मन्दान्कृत्स्नविन्न विचालयेत् ॥३-२९॥

prakṛter guṇasaṃmūḍhāḥ sajjante guṇakarmasu |
tān akṛtsnavido mandān kṛtsnavin na vicālayet ||3-29||

मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा ।
निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः ॥३-३०॥

mayi sarvāṇi karmāṇi saṃnyasyādhyātmacetasā |
nirāśīr nirmamo bhūtvā yudhyasva vigatajvaraḥ ||3-30||

ये मे मतमिदं नित्यमनुतिष्ठन्ति मानवाः ।
श्रद्धावन्तो ऽनसूयन्तो मुच्यन्ते ते ऽपि कर्मभिः ॥३-३१॥

ye me matam idaṃ nityam anutiṣṭhanti mānavāḥ |
śraddhāvanto 'nasūyanto mucyante te 'pi karmabhiḥ ||3-31||

ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम् ।
सर्वज्ञानविमूढांस्तान्विद्धि नष्टानचेतसः ॥३-३२॥

ye tv etad abhyasūyanto nānutiṣṭhanti me matam |
sarvajñānavimūḍhāṃs tān viddhi naṣṭān acetasaḥ ||3-32||

सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि ।
प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति ॥३-३३॥

sadṛśaṃ ceṣṭate svasyāḥ prakṛter jñānavān api |
prakṛtiṃ yānti bhūtāni nigrahaḥ kiṃ kariṣyati ||3-33||



इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ ।
तयोर्न वशमागच्छेत्तौ ह्यस्य परिपन्थिनौ ॥३-३४॥

indriyasyendriyasyārthe rāgadveṣau vyavasthitau |
tayor na vaśam āgacchet tau hy asya paripanthinau ||3-34||

श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥३-३५॥

śreyān svadharmo viguṇaḥ paradharmāt svanuṣṭhitāt |
svadharme nidhanaṃ śreyaḥ paradharmo bhayāvahaḥ ||3-35||

अर्जुन उवाच ।
अथ केन प्रयुक्तो ऽयं पापं चरति पूरुषः ।
अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः ॥३-३६॥

arjuna uvāca |
atha kena prayukto 'yaṃ pāpaṃ carati pūruṣaḥ |
anicchann api vārṣṇeya balād iva niyojitaḥ ||3-36||

श्रीभगवानुवाच ।
काम एष क्रोध एष रजोगुणसमुद्भवः ।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ॥३-३७॥

śrībhagavān uvāca |
kāma eṣa krodha eṣa rajoguṇasamudbhavaḥ |
mahāśano mahāpāpmā viddhy enam iha vairiṇam ||3-37||

धूमेनाव्रियते वह्निर्यथादर्शो मलेन च ।
यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतम् ॥३-३८॥

dhūmenāvriyate vahnir yathādarśo malena ca |
yatholbenāvṛto garbhas tathā tenedam āvṛtam ||3-38||

आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा ।
कामरूपेण कौन्तेय दुष्पूरेणानलेन च ॥३-३९॥

āvṛtaṃ jñānam etena jñānino nityavairiṇā |
kāmarūpeṇa kaunteya duṣpūreṇānalena ca ||3-39||

इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते ।
एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनम् ॥३-४०॥

indriyāṇi mano buddhir asyādhiṣṭhānam ucyate |
etair vimohayaty eṣa jñānam āvṛtya dehinam ||3-40||

तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ ।
पाप्मानं प्रजहिह्येनं ज्ञानविज्ञाननाशनम् ॥३-४१॥

tasmāt tvam indriyāṇy ādau niyamya bharatarṣabha |
pāpmānaṃ prajahihy enaṃ jñānavijñānanāśanam ||3-41||

इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः ।
मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः ॥३-४२॥

indriyāṇi parāṇy āhur indriyebhyaḥ paraṃ manaḥ |
manasas tu parā buddhir yo buddheḥ paratas tu saḥ ||3-42||

एवं बुद्धेः परं बुद्ध्वा संस्तभ्यात्मानमात्मना ।
जहि शत्रुं महाबाहो कामरूपं दुरासदम् ॥३-४३॥

evaṃ buddheḥ paraṃ buddhvā saṃstabhyātmānam ātmanā |
jahi śatruṃ mahābāho kāmarūpaṃ durāsadam ||3-43||

श्रीभगवानुवाच ।
इमं विवस्वते योगं प्रोक्तवानहमव्ययम् ।
विवस्वान्मनवे प्राह मनुरिक्ष्वाकवे ऽब्रवीत् ॥४-१॥

śrībhagavān uvāca |
imaṃ vivasvate yogaṃ proktavān aham avyayam |
vivasvān manave prāha manur ikṣvākave 'bravīt ||4-1||

एवं परंपराप्राप्तमिमं राजर्षयो विदुः ।
स कालेनेह महता योगो नष्टः परंतप ॥४-२॥

evaṃ paraṃparāprāptam imaṃ rājarṣayo viduḥ |
sa kāleneha mahatā yogo naṣṭaḥ paraṃtapa ||4-2||

स एवायं मया ते ऽद्य योगः प्रोक्तः पुरातनः ।
भक्तो ऽसि मे सखा चेति रहस्यं ह्येतदुत्तमम् ॥४-३॥

sa evāyaṃ mayā te 'dya yogaḥ proktaḥ purātanaḥ |
bhakto 'si me sakhā ceti rahasyaṃ hy etad uttamam ||4-3||



अर्जुन उवाच ।
अपरं भवतो जन्म परं जन्म विवस्वतः ।
कथमेतद्विजानीयां त्वमादौ प्रोक्तवानिति ॥४-४॥

arjuna uvāca |
aparaṃ bhavato janma paraṃ janma vivasvataḥ |
katham etad vijānīyāṃ tvam ādau proktavān iti ||4-4||

श्रीभगवानुवाच ।
बहूनि मे व्यतीतानि जन्मानि तव चार्जुन ।
तान्यहं वेद सर्वाणि न त्वं वेत्थ परंतप ॥४-५॥

śrībhagavān uvāca |
bahūni me vyatītāni janmāni tava cārjuna |
tāny ahaṃ veda sarvāṇi na tvaṃ vettha paraṃtapa ||4-5||

अजो ऽपि सन्नव्ययात्मा भूतानामीश्वरो ऽपि सन् ।
प्रकृतिं स्वामधिष्ठाय संभवाम्यात्ममायया ॥४-६॥

ajo 'pi sann avyayātmā bhūtānām īśvaro 'pi san |
prakṛtiṃ svām adhiṣṭhāya saṃbhavāmy ātmamāyayā ||4-6||

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥४-७॥

yadā yadā hi dharmasya glānir bhavati bhārata |
abhyutthānam adharmasya tadātmānaṃ sṛjāmy aham ||4-7||

परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय संभवामि युगे युगे ॥४-८॥

paritrāṇāya sādhūnāṃ vināśāya ca duṣkṛtām |
dharmasaṃsthāpanārthāya saṃbhavāmi yuge yuge ||4-8||

जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः ।
त्यक्त्वा देहं पुनर्जन्म नैति मामेति सो ऽर्जुन ॥४-९॥

janma karma ca me divyam evaṃ yo vetti tattvataḥ |
tyaktvā dehaṃ punarjanma naiti mām eti so 'rjuna ||4-9||

वीतरागभयक्रोधा मन्मया मामुपाश्रिताः ।
बहवो ज्ञानतपसा पूता मद्भावमागताः ॥४-१०॥
vītarāgabhayakrodhā manmayā mām upāśritāḥ |
bahavo jñānatapasā pūtā madbhāvam āgatāḥ ||4-10||

ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम् ।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥४-११॥
ye yathā māṃ prapadyante tāṃs tathaiva bhajāmy aham |
mama vartmānuvartante manuṣyāḥ pārtha sarvaśaḥ ||4-11||

काङ्क्षन्तः कर्मणां सिद्धिं यजन्त इह देवताः ।
क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्मजा ॥४-१२॥
kāṅkṣantaḥ karmaṇāṃ siddhiṃ yajanta iha devatāḥ |
kṣipraṃ hi mānuṣe loke siddhir bhavati karmajā ||4-12||

चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः ।
तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम् ॥४-१३॥
cāturvarṇyaṃ mayā sṛṣṭaṃ guṇakarmavibhāgaśaḥ |
tasya kartāram api māṃ viddhy akartāram avyayam ||4-13||

न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा ।
इति मां योऽभिजानाति कर्मभिर्न स बध्यते ॥४-१४॥
na māṃ karmāṇi limpanti na me karmaphale spṛhā |
iti māṃ yo 'bhijānāti karmabhir na sa badhyate ||4-14||

एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः ।
कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतम् ॥४-१५॥
evaṃ jñātvā kṛtaṃ karma pūrvair api mumukṣubhiḥ |
kuru karmaiva tasmāt tvaṃ pūrvaiḥ pūrvataraṃ kṛtam ||4-15||

किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः ।
तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥४-१६॥
kiṃ karma kim akarmeti kavayo 'py atra mohitāḥ |
tat te karma pravakṣyāmi yaj jñātvā mokṣyase 'śubhāt ||4-16||



कर्मणो ह्यपि बोद्धव्यं बोद्धव्यं च विकर्मणः ।
अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः ॥४-१७॥
karmaṇo hy api boddhavyaṃ boddhavyaṃ ca vikarmaṇaḥ |
akarmaṇaś ca boddhavyaṃ gahanā karmaṇo gatiḥ ||4-17||

कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः ।
स बुद्धिमान्मनुष्येषु स युक्तः कृत्स्नकर्मकृत् ॥४-१८॥
karmaṇy akarma yaḥ paśyed akarmaṇi ca karma yaḥ |
sa buddhimān manuṣyeṣu sa yuktaḥ kṛtsnakarmakṛt ||4-18||

यस्य सर्वे समारम्भाः कामसंकल्पवर्जिताः ।
ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः ॥४-१९॥
yasya sarve samārambhāḥ kāmasaṃkalpavarjitāḥ |
jñānāgnidagdhakarmāṇaṃ tam āhuḥ paṇḍitaṃ budhāḥ ||4-19||

त्यक्त्वा कर्मफलासङ्गं नित्यतृप्तो निराश्रयः ।
कर्मण्यभिप्रवृत्तोऽपि नैव किंचित्करोति सः ॥४-२०॥
tyaktvā karmaphalāsaṅgaṃ nityatṛpto nirāśrayaḥ |
karmaṇy abhipravṛtto 'pi naiva kiṃ cit karoti saḥ ||4-20||

निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः ।
शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥४-२१॥
nirāśīr yatacittātmā tyaktasarvaparigrahaḥ |
śārīraṃ kevalaṃ karma kurvan nāpnoti kilbiṣam ||4-21||

यदृच्छालाभसंतुष्टो द्वंद्वातीतो विमत्सरः ।
समः सिद्धावसिद्धौ च कृत्वापि न निबध्यते ॥४-२२॥
yadṛcchālābhasaṃtuṣṭo dvaṃdvātīto vimatsaraḥ |
samaḥ siddhāv asiddhau ca kṛtvāpi na nibadhyate ||4-22||

गतसङ्गस्य मुक्तस्य ज्ञानावस्थितचेतसः ।
यज्ञायाचरतः कर्म समग्रं प्रविलीयते ॥४-२३॥
gatasaṅgasya muktasya jñānāvasthitacetasaḥ |
yajñāyācarataḥ karma samagraṃ pravilīyate ||4-23||

ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणा हुतम् ।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ॥४-२४॥

brahmārpaṇaṃ brahmahavir brahmāgnau brahmaṇā hutam |
brahmaiva tena gantavyaṃ brahmakarmasamādhinā ||4-24||

दैवमेवापरे यज्ञं योगिनः पर्युपासते ।
ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोपजुह्वति ॥४-२५॥

daivam evāpare yajñaṃ yoginaḥ paryupāsate |
brahmāgnāv apare yajñaṃ yajñenaivopajuhvati ||4-25||

श्रोत्रादीनीन्द्रियाण्यन्ये संयमाग्निषु जुह्वति ।
शब्दादीन्विषयानन्य इन्द्रियाग्निषु जुह्वति ॥४-२६॥

śrotrādīnīndriyāṇy anye saṃyamāgniṣu juhvati |
śabdādīn viṣayān anya indriyāgniṣu juhvati ||4-26||

सर्वाणीन्द्रियकर्माणि प्राणकर्माणि चापरे ।
आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते ॥४-२७॥

sarvāṇīndriyakarmāṇi prāṇakarmāṇi cāpare |
ātmasaṃyamayogāgnau juhvati jñānadīpite ||4-27||

द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे ।
स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः ॥४-२८॥

dravyayajñās tapoyajñā yogayajñās tathāpare |
svādhyāyajñānayajñāś ca yatayaḥ saṃśitavratāḥ ||4-28||

अपाने जुह्वति प्राणं प्राणे ऽपानं तथापरे ।
प्राणापानगती रुद्ध्वा प्राणायामपरायणाः ॥४-२९॥

apāne juhvati prāṇaṃ prāṇe 'pānaṃ tathāpare |
prāṇāpānagatī ruddhvā prāṇāyāmaparāyaṇāḥ ||4-29||

अपरे नियताहाराः प्राणान्प्राणेषु जुह्वति ।
सर्वे ऽप्येते यज्ञविदो यज्ञक्षपितकल्मषाः ॥४-३०॥

apare niyatāhārāḥ prāṇān prāṇeṣu juhvati |
sarve 'py ete yajñavido yajñakṣapitakalmaṣāḥ ||4-30||



यज्ञशिष्टामृतभुजो यान्ति ब्रह्म सनातनम् ।
नायं लोको ऽस्त्ययज्ञस्य कुतो ऽन्यः कुरुसत्तम ॥४-३१॥

yajñaśiṣṭāmṛtabhujo yānti brahma sanātanam |
nāyaṃ loko 'sty ayajñasya kuto 'nyaḥ kurusattama ||4-31||

एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे ।
कर्मजान्विद्धि तान्सर्वानेवं ज्ञात्वा विमोक्ष्यसे ॥४-३२॥

evaṃ bahuvidhā yajñā vitatā brahmaṇo mukhe |
karmajān viddhi tān sarvān evaṃ jñātvā vimokṣyase ||4-32||

श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परंतप ।
सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते ॥४-३३॥

śreyān dravyamayād yajñāj jñānayajñaḥ paraṃtapa |
sarvaṃ karmākhilaṃ pārtha jñāne parisamāpyate ||4-33||

तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया ।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ॥४-३४॥

tad viddhi praṇipātena paripraśnena sevayā |
upadekṣyanti te jñānaṃ jñāninas tattvadarśinaḥ ||4-34||

यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पाण्डव ।
येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि ॥४-३५॥

yaj jñātvā na punar moham evaṃ yāsyasi pāṇḍava |
yena bhūtāny aśeṣeṇa drakṣyasy ātmany atho mayi ||4-35||

अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः ।
सर्वं ज्ञानप्लवेनैव वृजिनं संतरिष्यसि ॥४-३६॥

api ced asi pāpebhyaḥ sarvebhyaḥ pāpakṛttamaḥ |
sarvaṃ jñānaplavenaiva vṛjinaṃ saṃtariṣyasi ||4-36||

यथैधांसि समिद्धो ऽग्निर्भस्मसात्कुरुते ऽर्जुन ।
ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ॥४-३७॥

yathaidhāṃsi samiddho 'gnir bhasmasāt kurute 'rjuna |
jñānāgniḥ sarvakarmāṇi bhasmasāt kurute tathā ||4-37||

न हि ज्ञानेन सदृशं पवित्रमिह विद्यते ।
तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति ॥४-३८॥

na hi jñānena sadṛśaṃ pavitram iha vidyate |
tat svayaṃ yogasaṃsiddhaḥ kālenātmani vindati ||4-38||

श्रद्धावांल्लभते ज्ञानं तत्परः संयतेन्द्रियः ।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ॥४-३९॥

śraddhāvāṃl labhate jñānaṃ tatparaḥ saṃyatendriyaḥ |
jñānaṃ labdhvā parāṃ śāntim acireṇādhigacchati ||4-39||

अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति ।
नायं लोकोऽस्ति न परो न सुखं संशयात्मनः ॥४-४०॥

ajñaś cāśraddadhānaś ca saṃśayātmā vinaśyati |
nāyaṃ loko 'sti na paro na sukhaṃ saṃśayātmanaḥ ||4-40||

योगसंन्यस्तकर्माणं ज्ञानसंछिन्नसंशयम् ।
आत्मवन्तं न कर्माणि निबध्नन्ति धनंजय ॥४-४१॥

yogasaṃnyastakarmāṇaṃ jñānasaṃchinnasaṃśayam |
ātmavantaṃ na karmāṇi nibadhnanti dhanaṃjaya ||4-41||

तस्मादज्ञानसंभूतं हृत्स्थं ज्ञानासिनात्मनः ।
छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत ॥४-४२॥

tasmād ajñānasaṃbhūtaṃ hṛtsthaṃ jñānāsinātmanaḥ |
chittvainaṃ saṃśayaṃ yogam ātiṣṭhottiṣṭha bhārata ||4-42||

अर्जुन उवाच ।
संन्यासं कर्मणां कृष्ण पुनर्योगं च शंससि ।
यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितम् ॥५-१॥

arjuna uvāca |
saṃnyāsaṃ karmaṇāṃ kṛṣṇa punar yogaṃ ca śaṃsasi |
yac chreya etayor ekaṃ tan me brūhi suniścitam ||5-1||



श्रीभगवानुवाच ।
संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ ।
तयोस्तु कर्मसंन्यासात्कर्मयोगो विशिष्यते ॥५-२॥

śrībhagavān uvāca |
saṃnyāsaḥ karmayogaś ca niḥśreyasakarāv ubhau |
tayos tu karmasaṃnyāsāt karmayogo viśiṣyate ||5-2||

ज्ञेयः स नित्यसंन्यासी यो न द्वेष्टि न काङ्क्षति ।
निर्द्वंद्वो हि महाबाहो सुखं बन्धात्प्रमुच्यते ॥५-३॥

jñeyaḥ sa nityasaṃnyāsī yo na dveṣṭi na kāṅkṣati |
nirdvaṃdvo hi mahābāho sukhaṃ bandhāt pramucyate ||5-3||

सांख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः ।
एकमप्यास्थितः सम्यगुभयोर्विन्दते फलम् ॥५-४॥

sāṃkhyayogau pṛthag bālāḥ pravadanti na paṇḍitāḥ |
ekam apy āsthitaḥ samyag ubhayor vindate phalam ||5-4||

यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते ।
एकं सांख्यं च योगं च यः पश्यति स पश्यति ॥५-५॥

yat sāṃkhyaiḥ prāpyate sthānaṃ tad yogair api gamyate |
ekaṃ sāṃkhyaṃ ca yogaṃ ca yaḥ paśyati sa paśyati ||5-5||

संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः ।
योगयुक्तो मुनिर्ब्रह्म नचिरेणाधिगच्छति ॥५-६॥

saṃnyāsas tu mahābāho duḥkham āptum ayogataḥ |
yogayukto munir brahma nacireṇādhigacchati ||5-6||

योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रियः ।
सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते ॥५-७॥

yogayukto viśuddhātmā vijitātmā jitendriyaḥ |
sarvabhūtātmabhūtātmā kurvann api na lipyate ||5-7||

नैव किंचित्करोमीति युक्तो मन्येत तत्त्ववित् ।
पश्यञ्शृण्वन्स्पृशञ्जिघ्रन्नश्नन्गच्छन्स्वपञ्श्वसन् ॥५-८॥

naiva kiṃ cit karomīti yukto manyeta tattvavit |
paśyañ śṛṇvan spṛśañ jighrann aśnan gacchan svapañ śvasan ||5-8||

प्रलपन्विसृजन्गृह्णन्नुन्मिषन्निमिषन्नपि ।
इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन् ॥५-९॥

pralapan visṛjan gṛhṇann unmiṣan nimiṣann api ।
indriyāṇīndriyārtheṣu vartanta iti dhārayan ॥5-9॥

ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः ।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ॥५-१०॥

brahmaṇy ādhāya karmāṇi saṅgaṃ tyaktvā karoti yaḥ ।
lipyate na sa pāpena padmapatram ivāmbhasā ॥5-10॥

कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि ।
योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धये ॥५-११॥

kāyena manasā buddhyā kevalair indriyair api ।
yoginaḥ karma kurvanti saṅgaṃ tyaktvātmaśuddhaye ॥5-11॥

युक्तः कर्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम् ।
अयुक्तः कामकारेण फले सक्तो निबध्यते ॥५-१२॥

yuktaḥ karmaphalaṃ tyaktvā śāntim āpnoti naiṣṭhikīm ।
ayuktaḥ kāmakāreṇa phale sakto nibadhyate ॥5-12॥

सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी ।
नवद्वारे पुरे देही नैव कुर्वन्न कारयन् ॥५-१३॥

sarvakarmāṇi manasā saṃnyasyāste sukhaṃ vaśī ।
navadvāre pure dehī naiva kurvan na kārayan ॥5-13॥

न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः ।
न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते ॥५-१४॥

na kartṛtvaṃ na karmāṇi lokasya sṛjati prabhuḥ ।
na karmaphalasaṃyogaṃ svabhāvas tu pravartate ॥5-14॥

नादत्ते कस्य चित्पापं न चैव सुकृतं विभुः ।
अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः ॥५-१५॥

nādatte kasya cit pāpaṃ na caiva sukṛtaṃ vibhuḥ ।
ajñānenāvṛtaṃ jñānaṃ tena muhyanti jantavaḥ ॥5-15॥



ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः ।
तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम् ॥५-१६॥

jñānena tu tad ajñānaṃ yeṣāṃ nāśitam ātmanaḥ ।
teṣām ādityavaj jñānaṃ prakāśayati tatparam ॥5-16॥

तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः ।
गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः ॥५-१७॥

tadbuddhayas tadātmānas tanniṣṭhās tatparāyaṇāḥ ।
gacchanty apunarāvṛttiṃ jñānanirdhūtakalmaṣāḥ ॥5-17॥

विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि ।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ॥५-१८॥

vidyāvinayasampanne brāhmaṇe gavi hastini ।
śuni caiva śvapāke ca paṇḍitāḥ samadarśinaḥ ॥5-18॥

इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः ।
निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः ॥५-१९॥

ihaiva tair jitaḥ sargo yeṣāṃ sāmye sthitaṃ manaḥ ।
nirdoṣaṃ hi samaṃ brahma tasmād brahmaṇi te sthitāḥ ॥5-19॥

न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियम् ।
स्थिरबुद्धिरसंमूढो ब्रह्मविद्ब्रह्मणि स्थितः ॥५-२०॥

na prahṛṣyet priyaṃ prāpya nodvijet prāpya cāpriyam ।
sthirabuddhir asaṃmūḍho brahmavid brahmaṇi sthitaḥ ॥5-20॥

बाह्यस्पर्शेष्वसक्तात्मा विन्दत्यात्मनि यत्सुखम् ।
स ब्रह्मयोगयुक्तात्मा सुखमक्षयमश्नुते ॥५-२१॥

bāhyasparśeṣv asaktātmā vindaty ātmani yat sukham ।
sa brahmayogayuktātmā sukham akṣayam aśnute ॥5-21॥

ये हि संस्पर्शजा भोगा दुःखयोनय एव ते ।
आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः ॥५-२२॥

ye hi saṃsparśajā bhogā duḥkhayonaya eva te ।
ādyantavantaḥ kaunteya na teṣu ramate budhaḥ ॥5-22॥

शक्नोतीहैव यः सोढुं प्राक्शरीरविमोक्षणात् ।
कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः ॥५-२३॥

śaknotīhaiva yaḥ soḍhuṃ prāk śarīravimokṣaṇāt |
kāmakrodhodbhavaṃ vegaṃ sa yuktaḥ sa sukhī naraḥ ||5-23||

यो ऽन्तःसुखो ऽन्तरारामस्तथान्तर्ज्योतिरेव यः ।
स योगी ब्रह्मनिर्वाणं ब्रह्मभूतो ऽधिगच्छति ॥५-२४॥

yo 'ntaḥsukho 'ntarārāmas tathāntarjyotir eva yaḥ |
sa yogī brahmanirvāṇaṃ brahmabhūto 'dhigacchati ||5-24||

लभन्ते ब्रह्मनिर्वाणमृषयः क्षीणकल्मषाः ।
छिन्नद्वैधा यतात्मानः सर्वभूतहिते रताः ॥५-२५॥

labhante brahmanirvāṇam ṛṣayaḥ kṣīṇakalmaṣāḥ |
chinnadvaidhā yatātmānaḥ sarvabhūtahite ratāḥ ||5-25||

कामक्रोधवियुक्तानां यतीनां यतचेतसाम् ।
अभितो ब्रह्मनिर्वाणं वर्तते विदितात्मनाम् ॥५-२६॥

kāmakrodhaviyuktānāṃ yatīnāṃ yatacetasām |
abhito brahmanirvāṇaṃ vartate viditātmanām ||5-26||

स्पर्शान्कृत्वा बहिर्बाह्यांश्चक्षुश्चैवान्तरे भ्रुवोः ।
प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणौ ॥५-२७॥

sparśān kṛtvā bahir bāhyāṃś cakṣuś caivāntare bhruvoḥ |
prāṇāpānau samau kṛtvā nāsābhyantaracāriṇau ||5-27||

यतेन्द्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः ।
विगतेच्छाभयक्रोधो यः सदा मुक्त एव सः ॥५-२८॥

yatendriyamanobuddhir munir mokṣaparāyaṇaḥ |
vigatecchābhayakrodho yaḥ sadā mukta eva saḥ ||5-28||

भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम् ।
सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति ॥५-२९॥

bhoktāraṃ yajñatapasāṃ sarvalokamaheśvaram |
suhṛdaṃ sarvabhūtānāṃ jñātvā māṃ śāntim ṛcchati ||5-29||



श्रीभगवानुवाच ।
अनाश्रितः कर्मफलं कार्यं कर्म करोति यः ।
स संन्यासी च योगी च न निरग्निर्न चाक्रियः ॥६-१॥

śrībhagavān uvāca |
anāśritaḥ karmaphalaṃ kāryaṃ karma karoti yaḥ |
sa saṃnyāsī ca yogī ca na niragnir na cākriyaḥ ||6-1||

यं संन्यासमिति प्राहुर्योगं तं विद्धि पाण्डव ।
न ह्यसंन्यस्तसंकल्पो योगी भवति कश्चन ॥६-२॥

yaṃ saṃnyāsam iti prāhur yogaṃ taṃ viddhi pāṇḍava |
na hy asaṃnyastasaṃkalpo yogī bhavati kaś cana ||6-2||

आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते ।
योगारूढस्य तस्यैव शमः कारणमुच्यते ॥६-३॥

ārurukṣor muner yogaṃ karma kāraṇam ucyate |
yogārūḍhasya tasyaiva śamaḥ kāraṇam ucyate ||6-3||

यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्जते ।
सर्वसंकल्पसंन्यासी योगारूढस्तदोच्यते ॥६-४॥

yadā hi nendriyārtheṣu na karmasv anuṣajjate |
sarvasaṃkalpasaṃnyāsī yogārūḍhas tadocyate ||6-4||

उद्धरेदात्मनात्मानं नात्मानमवसादयेत् ।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ॥६-५॥

uddhared ātmanātmānaṃ nātmānam avasādayet |
ātmaiva hy ātmano bandhur ātmaiva ripur ātmanaḥ ||6-5||

बन्धुरात्मात्मनस्तस्य येनात्मैवात्मना जितः ।
अनात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत् ॥६-६॥

bandhur ātmātmanas tasya yenātmaivātmanā jitaḥ |
anātmanas tu śatrutve vartetātmaiva śatruvat ||6-6||

जितात्मनः प्रशान्तस्य परमात्मा समाहितः ।
शीतोष्णसुखदुःखेषु तथा मानावमानयोः ॥६-७॥

jitātmanaḥ praśāntasya paramātmā samāhitaḥ |
śītoṣṇasukhaduḥkheṣu tathā mānāvamānayoḥ ||6-7||

ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेन्द्रियः ।
युक्त इत्युच्यते योगी समलोष्टाश्मकाञ्चनः ॥ ६-८ ॥

jñānavijñānatṛptātmā kūṭastho vijitendriyaḥ |
yukta ity ucyate yogī samaloṣṭāśmakāñcanaḥ ||6-8||

सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु ।
साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते ॥ ६-९ ॥

suhṛnmitrāryudāsīnamadhyasthadveṣyabandhuṣu |
sādhuṣv api ca pāpeṣu samabuddhir viśiṣyate ||6-9||

योगी युञ्जीत सततमात्मानं रहसि स्थितः ।
एकाकी यतचित्तात्मा निराशीरपरिग्रहः ॥ ६-१० ॥

yogī yuñjīta satatam ātmānaṃ rahasi sthitaḥ |
ekākī yatacittātmā nirāśīr aparigrahaḥ ||6-10||

शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः ।
नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम् ॥ ६-११ ॥

śucau deśe pratiṣṭhāpya sthiram āsanam ātmanaḥ |
nātyucchritaṃ nātinīcaṃ cailājinakuśottaram ||6-11||

तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः ।
उपविश्यासने युञ्ज्याद्योगमात्मविशुद्धये ॥ ६-१२ ॥

tatraikāgraṃ manaḥ kṛtvā yatacittendriyakriyaḥ |
upaviśyāsane yuñjyād yogam ātmaviśuddhaye ||6-12||

समं कायशिरोग्रीवं धारयन्नचलं स्थिरः ।
संप्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन् ॥ ६-१३ ॥

samaṃ kāyaśirogrīvaṃ dhārayann acalaṃ sthiraḥ |
saṃprekṣya nāsikāgraṃ svaṃ diśaś cānavalokayan ||6-13||

प्रशान्तात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः ।
मनः संयम्य मच्चित्तो युक्त आसीत मत्परः ॥ ६-१४ ॥

praśāntātmā vigatabhīr brahmacārivrate sthitaḥ |
manaḥ saṃyamya maccitto yukta āsīta matparaḥ ||6-14||



युञ्जन्नेवं सदात्मानं योगी नियतमानसः ।
शान्तिं निर्वाणपरमां मत्संस्थामधिगच्छति ॥ ६-१५ ॥

yuñjann evaṃ sadātmānaṃ yogī niyatamānasaḥ |
śāntiṃ nirvāṇaparamāṃ matsaṃsthām adhigacchati ||6-15||

नात्यश्नतस्तु योगोऽस्ति न चैकान्तमनश्नतः ।
न चातिस्वप्नशीलस्य जाग्रतो नैव चार्जुन ॥ ६-१६ ॥

nātyaśnatas tu yogo 'sti na caikāntam anaśnataḥ |
na cātisvapnaśīlasya jāgrato naiva cārjuna ||6-16||

युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु ।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ॥ ६-१७ ॥

yuktāhāravihārasya yuktaceṣṭasya karmasu |
yuktasvapnāvabodhasya yogo bhavati duḥkhahā ||6-17||

यदा विनियतं चित्तमात्मन्येवावतिष्ठते ।
निःस्पृहः सर्वकामेभ्यो युक्त इत्युच्यते तदा ॥ ६-१८ ॥

yadā viniyataṃ cittam ātmany evāvatiṣṭhate |
niḥspṛhaḥ sarvakāmebhyo yukta ity ucyate tadā ||6-18||

यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता ।
योगिनो यतचित्तस्य युञ्जतो योगमात्मनः ॥ ६-१९ ॥

yathā dīpo nivātastho neṅgate sopamā smṛtā |
yogino yatacittasya yuñjato yogam ātmanaḥ ||6-19||

यत्रोपरमते चित्तं निरुद्धं योगसेवया ।
यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति ॥ ६-२० ॥

yatroparamate cittaṃ niruddhaṃ yogasevayā |
yatra caivātmanātmānaṃ paśyann ātmani tuṣyati ||6-20||

सुखमात्यन्तिकं यत्तद्बुद्धिग्राह्यमतीन्द्रियम् ।
वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः ॥ ६-२१ ॥

sukham ātyantikaṃ yat tad buddhigrāhyam atīndriyam |
vetti yatra na caivāyaṃ sthitaś calati tattvataḥ ||6-21||

यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः ।
यस्मिन्स्थितो न दुःखेन गुरुणापि विचाल्यते ॥६-२२॥

yaṃ labdhvā cāparaṃ lābhaṃ manyate nādhikaṃ tataḥ |
yasmin sthito na duḥkhena guruṇāpi vicālyate ||6-22||

तं विद्याद्दुःखसंयोगवियोगं योगसंज्ञितम् ।
स निश्चयेन योक्तव्यो योगो ऽनिर्विण्णचेतसा ॥६-२३॥

taṃ vidyād duḥkhasaṃyogaviyogaṃ yogasaṃjñitam |
sa niścayena yoktavyo yogo 'nirviṇṇacetasā ||6-23||

संकल्पप्रभवान्कामांस्त्यक्त्वा सर्वानशेषतः ।
मनसैवेन्द्रियग्रामं विनियम्य समन्ततः ॥६-२४॥

saṃkalpaprabhavān kāmāṃs tyaktvā sarvān aśeṣataḥ |
manasaivendriyagrāmaṃ viniyamya samantataḥ ||6-24||

शनैः शनैरुपरमेद्बुद्ध्या धृतिगृहीतया ।
आत्मसंस्थं मनः कृत्वा न किं चिदपि चिन्तयेत् ॥६-२५॥

śanaiḥ śanair uparamed buddhyā dhṛtigṛhītayā |
ātmasaṃsthaṃ manaḥ kṛtvā na kiṃ cid api cintayet ||6-25||

यतो यतो निश्चरति मनश्चञ्चलमस्थिरम् ।
ततस्ततो नियम्यैतदात्मन्येव वशं नयेत् ॥६-२६॥

yato yato niścarati manaś cañcalam asthiram |
tatas tato niyamyaitad ātmany eva vaśaṃ nayet ||6-26||

प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमम् ।
उपैति शान्तरजसं ब्रह्मभूतमकल्मषम् ॥६-२७॥

praśāntamanasaṃ hy enaṃ yoginaṃ sukham uttamam |
upaiti śāntarajasaṃ brahmabhūtam akalmaṣam ||6-27||

युञ्जन्नेवं सदात्मानं योगी विगतकल्मषः ।
सुखेन ब्रह्मसंस्पर्शमत्यन्तं सुखमश्नुते ॥६-२८॥

yuñjann evaṃ sadātmānaṃ yogī vigatakalmaṣaḥ |
sukhena brahmasaṃsparśam atyantaṃ sukham aśnute ||6-28||



सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ।
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ॥६-२९॥

sarvabhūtastham ātmānaṃ sarvabhūtāni cātmani |
īkṣate yogayuktātmā sarvatra samadarśanaḥ ||6-29||

यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति ।
तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ॥६-३०॥

yo māṃ paśyati sarvatra sarvaṃ ca mayi paśyati |
tasyāhaṃ na praṇaśyāmi sa ca me na praṇaśyati ||6-30||

सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः ।
सर्वथा वर्तमानो ऽपि स योगी मयि वर्तते ॥६-३१॥

sarvabhūtasthitaṃ yo māṃ bhajaty ekatvam āsthitaḥ |
sarvathā vartamāno 'pi sa yogī mayi vartate ||6-31||

आत्मौपम्येन सर्वत्र समं पश्यति यो ऽर्जुन ।
सुखं वा यदि वा दुःखं स योगी परमो मतः ॥६-३२॥

ātmaupamyena sarvatra samaṃ paśyati yo 'rjuna |
sukhaṃ vā yadi vā duḥkhaṃ sa yogī paramo mataḥ ||6-32||

अर्जुन उवाच ।
यो ऽयं योगस्त्वया प्रोक्तः साम्येन मधुसूदन ।
एतस्याहं न पश्यामि चञ्चलत्वात्स्थितिं स्थिराम् ॥६-३३॥

arjuna uvāca |
yo 'yaṃ yogas tvayā proktaḥ sāmyena madhusūdana |
etasyāhaṃ na paśyāmi cañcalatvāt sthitiṃ sthirām ||6-33||

चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम् ।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ॥६-३४॥

cañcalaṃ hi manaḥ kṛṣṇa pramāthi balavad dṛḍham |
tasyāhaṃ nigrahaṃ manye vāyor iva suduṣkaram ||6-34||

श्रीभगवानुवाच ।
असंशयं महाबाहो मनो दुर्निग्रहं चलम् ।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ॥६-३५॥

śrībhagavān uvāca |
asaṃśayaṃ mahābāho mano durnigrahaṃ calam |
abhyāsena tu kaunteya vairāgyeṇa ca gṛhyate ||6-35||

असंयतात्मना योगो दुष्प्राप इति मे मतिः ।
वश्यात्मना तु यतता शक्यो ऽवाप्तुमुपायतः ॥६-३६॥

asaṃyatātmanā yogo duṣprāpa iti me matiḥ |
vaśyātmanā tu yatatā śakyo 'vāptum upāyataḥ ||6-36||

अर्जुन उवाच ।
अयतिः श्रद्धयोपेतो योगाच्चलितमानसः ।
अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति ॥६-३७॥

arjuna uvāca |
ayatiḥ śraddhayopeto yogāc calitamānasaḥ |
aprāpya yogasaṃsiddhiṃ kāṃ gatiṃ kṛṣṇa gacchati ||6-37||

कच्चिन्नोभयविभ्रष्टश्छिन्नाभ्रमिव नश्यति ।
अप्रतिष्ठो महाबाहो विमूढो ब्रह्मणः पथि ॥६-३८॥

kaccin nobhayavibhraṣṭaś chinnābhram iva naśyati |
apratiṣṭho mahābāho vimūḍho brahmaṇaḥ pathi ||6-38||

एतन्मे संशयं कृष्ण छेत्तुमर्हस्यशेषतः ।
त्वदन्यः संशयस्यास्य छेत्ता न ह्युपपद्यते ॥६-३९॥

etan me saṃśayaṃ kṛṣṇa chettum arhasy aśeṣataḥ |
tvad anyaḥ saṃśayasyāsya chettā na hy upapadyate ||6-39||

श्रीभगवानुवाच ।
पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते ।
न हि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छति ॥६-४०॥

śrībhagavān uvāca |
pārtha naiveha nāmutra vināśas tasya vidyate |
na hi kalyāṇakṛt kaś cid durgatiṃ tāta gacchati ||6-40||



प्राप्य पुण्यकृतांल्लोकानुषित्वा शाश्वतीः समाः ।
शुचीनां श्रीमतां गेहे योगभ्रष्टो ऽभिजायते ॥६-४१॥

prāpya puṇyakṛtāṃl lokān uṣitvā śāśvatīḥ samāḥ |
śucīnāṃ śrīmatāṃ gehe yogabhraṣṭo 'bhijāyate ||6-41||

अथ वा योगिनामेव कुले भवति धीमताम् ।
एतद्धि दुर्लभतरं लोके जन्म यदीदृशम् ॥६-४२॥

atha vā yoginām eva kule bhavati dhīmatām |
etad dhi durlabhataraṃ loke janma yad īdṛśam ||6-42||

तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकम् ।
यतते च ततो भूयः संसिद्धौ कुरुनन्दन ॥६-४३॥

tatra taṃ buddhisaṃyogaṃ labhate paurvadehikam |
yatate ca tato bhūyaḥ saṃsiddhau kurunandana ||6-43||

पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशो ऽपि सः ।
जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्तते ॥६-४४॥

pūrvābhyāsena tenaiva hriyate hy avaśo 'pi saḥ |
jijñāsur api yogasya śabdabrahmātivartate ||6-44||

प्रयत्नाद्यतमानस्तु योगी संशुद्धकिल्बिषः ।
अनेकजन्मसंसिद्धस्ततो याति परां गतिम् ॥६-४५॥

prayatnād yatamānas tu yogī saṃśuddhakilbiṣaḥ |
anekajanmasaṃsiddhas tato yāti parāṃ gatim ||6-45||

तपस्विभ्यो ऽधिको योगी ज्ञानिभ्यो ऽपि मतो ऽधिकः ।
कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन ॥६-४६॥

tapasvibhyo 'dhiko yogī jñānibhyo 'pi mato 'dhikaḥ |
karmibhyaś cādhiko yogī tasmād yogī bhavārjuna ||6-46||

योगिनामपि सर्वेषां मद्गतेनान्तरात्मना ।
श्रद्धावान्भजते यो मां स मे युक्ततमो मतः ॥६-४७॥

yoginām api sarveṣāṃ madgatenāntarātmanā |
śraddhāvān bhajate yo māṃ sa me yuktatamo mataḥ ||6-47||

श्रीभगवानुवाच ।
मय्यासक्तमनाः पार्थ योगं युञ्जन्मदाश्रयः ।
असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु ॥७-१॥

śrībhagavān uvāca |
mayy āsaktamanāḥ pārtha yogaṃ yuñjan madāśrayaḥ |
asaṃśayaṃ samagraṃ māṃ yathā jñāsyasi tac chṛṇu ||7-1||

ज्ञानं ते ऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः ।
यज्ज्ञात्वा नेह भूयो ऽन्यज्ज्ञातव्यमवशिष्यते ॥७-२॥

jñānaṃ te 'haṃ savijñānam idaṃ vakṣyāmy aśeṣataḥ |
yaj jñātvā neha bhūyo 'nyaj jñātavyam avaśiṣyate ||7-2||

मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये ।
यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः ॥७-३॥

manuṣyāṇāṃ sahasreṣu kaś cid yatati siddhaye |
yatatām api siddhānāṃ kaś cin māṃ vetti tattvataḥ ||7-3||

भूमिरापो ऽनलो वायुः खं मनो बुद्धिरेव च ।
अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥७-४॥

bhūmir āpo 'nalo vāyuḥ khaṃ mano buddhir eva ca |
ahaṃkāra itīyaṃ me bhinnā prakṛtir aṣṭadhā ||7-4||

अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् ।
जीवभूतां महाबाहो ययेदं धार्यते जगत् ॥७-५॥

apareyam itas tv anyāṃ prakṛtiṃ viddhi me parām |
jīvabhūtāṃ mahābāho yayedaṃ dhāryate jagat ||7-5||

एतद्योनीनि भूतानि सर्वाणीत्युपधारय ।
अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा ॥७-६॥

etadyonīni bhūtāni sarvāṇīty upadhāraya |
ahaṃ kṛtsnasya jagataḥ prabhavaḥ pralayas tathā ||7-6||

मत्तः परतरं नान्यत्किं चिदस्ति धनंजय ।
मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ॥७-७॥

mattaḥ parataraṃ nānyat kiṃ cid asti dhanaṃjaya |
mayi sarvam idaṃ protaṃ sūtre maṇigaṇā iva ||7-7||



रसो ऽहमप्सु कौन्तेय प्रभास्मि शशिसूर्ययोः ।
प्रणवः सर्ववेदेषु शब्दः खे पौरुषं नृषु ॥७-८॥

raso 'ham apsu kaunteya prabhāsmi śaśisūryayoḥ |
praṇavaḥ sarvavedeṣu śabdaḥ khe pauruṣaṃ nṛṣu ||7-8||

पुण्यो गन्धः पृथिव्यां च तेजश्चास्मि विभावसौ ।
जीवनं सर्वभूतेषु तपश्चास्मि तपस्विषु ॥७-९॥

puṇyo gandhaḥ pṛthivyāṃ ca tejaś cāsmi vibhāvasau |
jīvanaṃ sarvabhūteṣu tapaś cāsmi tapasviṣu ||7-9||

बीजं मां सर्वभूतानां विद्धि पार्थ सनातनम् ।
बुद्धिर्बुद्धिमतामस्मि तेजस्तेजस्विनामहम् ॥७-१०॥

bījaṃ māṃ sarvabhūtānāṃ viddhi pārtha sanātanam |
buddhir buddhimatām asmi tejas tejasvinām aham ||7-10||

बलं बलवतां चाहं कामरागविवर्जितम् ।
धर्माविरुद्धो भूतेषु कामो ऽस्मि भरतर्षभ ॥७-११॥

balaṃ balavatāṃ cāhaṃ kāmarāgavivarjitam |
dharmāviruddho bhūteṣu kāmo 'smi bharatarṣabha ||7-11||

ये चैव सात्त्विका भावा राजसास्तामसाश्च ये ।
मत्त एवेति तान्विद्धि न त्वहं तेषु ते मयि ॥७-१२॥

ye caiva sāttvikā bhāvā rājasās tāmasāś ca ye |
matta eveti tān viddhi na tv ahaṃ teṣu te mayi ||7-12||

त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत् ।
मोहितं नाभिजानाति मामेभ्यः परमव्ययम् ॥७-१३॥

tribhir guṇamayair bhāvair ebhiḥ sarvam idaṃ jagat |
mohitaṃ nābhijānāti mām ebhyaḥ param avyayam ||7-13||

दैवी ह्येषा गुणमयी मम माया दुरत्यया ।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥७-१४॥

daivī hy eṣā guṇamayī mama māyā duratyayā |
mām eva ye prapadyante māyām etāṃ taranti te ||7-14||

न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः ।
माययापहृतज्ञाना आसुरं भावमाश्रिताः ॥७-१५॥

na māṃ duṣkṛtino mūḍhāḥ prapadyante narādhamāḥ |
māyayāpahṛtajñānā āsuraṃ bhāvam āśritāḥ ||7-15||

चतुर्विधा भजन्ते मां जनाः सुकृतिनो ऽर्जुन ।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ॥७-१६॥

caturvidhā bhajante māṃ janāḥ sukṛtino 'rjuna |
ārto jijñāsur arthārthī jñānī ca bharatarṣabha ||7-16||

तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते ।
प्रियो हि ज्ञानिनो ऽत्यर्थमहं स च मम प्रियः ॥७-१७॥

teṣāṃ jñānī nityayukta ekabhaktir viśiṣyate |
priyo hi jñānino 'tyartham ahaṃ sa ca mama priyaḥ ||7-17||

उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतम् ।
आस्थितः स हि युक्तात्मा मामेवानुत्तमां गतिम् ॥७-१८॥

udārāḥ sarva evaite jñānī tv ātmaiva me matam |
āsthitaḥ sa hi yuktātmā mām evānuttamāṃ gatim ||7-18||

बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते ।
वासुदेवः सर्वमिति स महात्मा सुदुर्लभः ॥७-१९॥

bahūnāṃ janmanām ante jñānavān māṃ prapadyate |
vāsudevaḥ sarvam iti sa mahātmā sudurlabhaḥ ||7-19||

कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यन्ते ऽन्यदेवताः ।
तं तं नियममास्थाय प्रकृत्या नियताः स्वया ॥७-२०॥

kāmais tais tair hṛtajñānāḥ prapadyante 'nyadevatāḥ |
taṃ taṃ niyamam āsthāya prakṛtyā niyatāḥ svayā ||7-20||

यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति ।
तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् ॥७-२१॥

yo yo yāṃ yāṃ tanuṃ bhaktaḥ śraddhayārcitum icchati |
tasya tasyācalāṃ śraddhāṃ tām eva vidadhāmy aham ||7-21||



स तया श्रद्धया युक्तस्तस्या राधनमीहते ।
लभते च ततः कामान्मयैव विहितान्हि तान् ॥७-२२॥

sa tayā śraddhayā yuktas tasyā rādhanam īhate |
labhate ca tataḥ kāmān mayaiva vihitān hi tān ||7-22||

अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसाम् ।
देवान्देवयजो यान्ति मद्भक्ता यान्ति मामपि ॥७-२३॥

antavat tu phalaṃ teṣāṃ tad bhavaty alpamedhasām |
devān devayajo yānti madbhaktā yānti mām api ||7-23||

अव्यक्तं व्यक्तिमापन्नं मन्यन्ते मामबुद्धयः ।
परं भावमजानन्तो ममाव्ययमनुत्तमम् ॥७-२४॥

avyaktaṃ vyaktim āpannaṃ manyante mām abuddhayaḥ |
paraṃ bhāvam ajānanto mamāvyayam anuttamam ||7-24||

नाहं प्रकाशः सर्वस्य योगमायासमावृतः ।
मूढो ऽयं नाभिजानाति लोको मामजमव्ययम् ॥७-२५॥

nāhaṃ prakāśaḥ sarvasya yogamāyāsamāvṛtaḥ |
mūḍho 'yaṃ nābhijānāti loko mām ajam avyayam ||7-25||

वेदाहं समतीतानि वर्तमानानि चार्जुन ।
भविष्याणि च भूतानि मां तु वेद न कश्चन ॥७-२६॥

vedāhaṃ samatītāni vartamānāni cārjuna |
bhaviṣyāṇi ca bhūtāni māṃ tu veda na kaś cana ||7-26||

इच्छाद्वेषसमुत्थेन द्वंद्वमोहेन भारत ।
सर्वभूतानि संमोहं सर्गे यान्ति परंतप ॥७-२७॥

icchādveṣasamutthena dvaṃdvamohena bhārata |
sarvabhūtāni saṃmohaṃ sarge yānti paraṃtapa ||7-27||

येषां त्वन्तगतं पापं जनानां पुण्यकर्मणाम् ।
ते द्वंद्वमोहनिर्मुक्ता भजन्ते मां दृढव्रताः ॥७-२८॥

yeṣāṃ tv antagataṃ pāpaṃ janānāṃ puṇyakarmaṇām |
te dvaṃdvamohanirmuktā bhajante māṃ dṛḍhavratāḥ ||7-28||

जरामरणमोक्षाय मामाश्रित्य यतन्ति ये ।
ते ब्रह्म तद्विदुः कृत्स्नमध्यात्मं कर्म चाखिलम् ॥७-२९॥

jarāmaraṇamokṣāya mām āśritya yatanti ye |
te brahma tad viduḥ kṛtsnam adhyātmaṃ karma cākhilam ||7-29||

साधिभूताधिदैवं मां साधियज्ञं च ये विदुः ।
प्रयाणकाले ऽपि च मां ते विदुर्युक्तचेतसः ॥७-३०॥

sādhibhūtādhidaivaṃ māṃ sādhiyajñaṃ ca ye viduḥ |
prayāṇakāle 'pi ca māṃ te vidur yuktacetasaḥ ||7-30||

अर्जुन उवाच ।
किं तद्ब्रह्म किमध्यात्मं किं कर्म पुरुषोत्तम ।
अधिभूतं च किं प्रोक्तमधिदैवं किमुच्यते ॥८-१॥

arjuna uvāca |
kiṃ tad brahma kim adhyātmaṃ kiṃ karma puruṣottama |
adhibhūtaṃ ca kiṃ proktam adhidaivaṃ kim ucyate ||8-1||

अधियज्ञः कथं को ऽत्र देहे ऽस्मिन्मधुसूदन ।
प्रयाणकाले च कथं ज्ञेयो ऽसि नियतात्मभिः ॥८-२॥

adhiyajñaḥ kathaṃ ko 'tra dehe 'smin madhusūdana |
prayāṇakāle ca kathaṃ jñeyo 'si niyatātmabhiḥ ||8-2||

श्रीभगवानुवाच ।
अक्षरं ब्रह्म परमं स्वभावो ऽध्यात्ममुच्यते ।
भूतभावोद्भवकरो विसर्गः कर्मसंज्ञितः ॥८-३॥

śrībhagavān uvāca |
akṣaraṃ brahma paramaṃ svabhāvo 'dhyātmam ucyate |
bhūtabhāvodbhavakaro visargaḥ karmasaṃjñitaḥ ||8-3||

अधिभूतं क्षरो भावः पुरुषश्चाधिदैवतम् ।
अधियज्ञो ऽहमेवात्र देहे देहभृतां वर ॥८-४॥

adhibhūtaṃ kṣaro bhāvaḥ puruṣaś cādhidaivatam |
adhiyajño 'ham evātra dehe dehabhṛtāṃ vara ||8-4||



अन्तकाले च मामेव स्मरन्मुक्त्वा कलेवरम् ।
यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः ॥८-५॥

antakāle ca mām eva smaran muktvā kalevaram |
yaḥ prayāti sa madbhāvaṃ yāti nāsty atra saṃśayaḥ ||8-5||

यं यं वापि स्मरन्भावं त्यजत्यन्ते कलेवरम् ।
तं तमेवैति कौन्तेय सदा तद्भावभावितः ॥८-६॥

yaṃ yaṃ vāpi smaran bhāvaṃ tyajaty ante kalevaram |
taṃ tam evaiti kaunteya sadā tadbhāvabhāvitaḥ ||8-6||

तस्मात्सर्वेषु कालेषु मामनुस्मर युध्य च ।
मय्यर्पितमनोबुद्धिर्मामेवैष्यस्यसंशयः ॥८-७॥

tasmāt sarveṣu kāleṣu mām anusmara yudhya ca |
mayy arpitamanobuddhir mām evaiṣyasy asaṃśayaḥ ||8-7||

अभ्यासयोगयुक्तेन चेतसा नान्यगामिना ।
परमं पुरुषं दिव्यं याति पार्थानुचिन्तयन् ॥८-८॥

abhyāsayogayuktena cetasā nānyagāminā |
paramaṃ puruṣaṃ divyaṃ yāti pārthānucintayan ||8-8||

कविं पुराणमनुशासितारम्
अणोरणीयांसमनुस्मरेद्यः ।
सर्वस्य धातारमचिन्त्यरूपम्
आदित्यवर्णं तमसः परस्तात् ॥८-९॥

kaviṃ purāṇam anuśāsitāram; aṇor aṇīyāṃsam anusmared yaḥ |
sarvasya dhātāram acintyarūpam; ādityavarṇaṃ tamasaḥ parastāt ||8-9||

प्रयाणकाले मनसाचलेन
भक्त्या युक्तो योगबलेन चैव ।
भ्रुवोर्मध्ये प्राणमावेश्य सम्यक्
स तं परं पुरुषमुपैति दिव्यम् ॥८-१०॥

prayāṇakāle manasācalena; bhaktyā yukto yogabalena caiva |
bhruvor madhye prāṇam āveśya samyak; sa taṃ paraṃ puruṣam upaiti divyam ||8-10||

यदक्षरं वेदविदो वदन्ति
विशन्ति यद्यतयो वीतरागाः ।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति
तत्ते पदं संग्रहेण प्रवक्ष्ये ॥८-११॥

yad akṣaraṃ vedavido vadanti; viśanti yad yatayo vītarāgāḥ |
yad icchanto brahmacaryaṃ caranti; tat te padaṃ saṃgraheṇa pravakṣye ||8-11||

सर्वद्वाराणि संयम्य मनो हृदि निरुध्य च ।
मूर्ध्न्याधायात्मनः प्राणमास्थितो योगधारणाम् ॥८-१२॥

sarvadvārāṇi saṃyamya mano hṛdi nirudhya ca |
mūrdhny ādhāyātmanaḥ prāṇam āsthito yogadhāraṇām ||8-12||

ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् ।
यः प्रयाति त्यजन्देहं स याति परमां गतिम् ॥८-१३॥

om ity ekākṣaraṃ brahma vyāharan mām anusmaran |
yaḥ prayāti tyajan dehaṃ sa yāti paramāṃ gatim ||8-13||

अनन्यचेताः सततं यो मां स्मरति नित्यशः ।
तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः ॥८-१४॥

ananyacetāḥ satataṃ yo māṃ smarati nityaśaḥ |
tasyāhaṃ sulabhaḥ pārtha nityayuktasya yoginaḥ ||8-14||

मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम् ।
नाप्नुवन्ति महात्मानः संसिद्धिं परमां गताः ॥८-१५॥

mām upetya punarjanma duḥkhālayam aśāśvatam |
nāpnuvanti mahātmānaḥ saṃsiddhiṃ paramāṃ gatāḥ ||8-15||

आ ब्रह्मभुवनाल्लोकाः पुनरावर्तिनो ऽर्जुन ।
मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते ॥८-१६॥

ā brahmabhuvanāl lokāḥ punarāvartino 'rjuna |
mām upetya tu kaunteya punarjanma na vidyate ||8-16||

सहस्रयुगपर्यन्तमहर्यद्ब्रह्मणो विदुः ।
रात्रिं युगसहस्रान्तां ते ऽहोरात्रविदो जनाः ॥८-१७॥

sahasrayugaparyantam ahar yad brahmaṇo viduḥ |



rātriṃ yugasahasrāntāṃ te 'horātravido janāḥ ||8-17||

अव्यक्ताद्व्यक्तयः सर्वाः प्रभवन्त्यहरागमे ।
रात्र्यागमे प्रलीयन्ते तत्रैवाव्यक्तसंज्ञके ॥८-१८॥

avyaktād vyaktayaḥ sarvāḥ prabhavanty aharāgame |
rātryāgame pralīyante tatraivāvyaktasaṃjñake ||8-18||

भूतग्रामः स एवायं भूत्वा भूत्वा प्रलीयते ।
रात्र्यागमे ऽवशः पार्थ प्रभवत्यहरागमे ॥८-१९॥

bhūtagrāmaḥ sa evāyaṃ bhūtvā bhūtvā pralīyate |
rātryāgame 'vaśaḥ pārtha prabhavaty aharāgame ||8-19||

परस्तस्मात्तु भावो ऽन्यो ऽव्यक्तो ऽव्यक्तात्सनातनः ।
यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यति ॥८-२०॥

paras tasmāt tu bhāvo 'nyo 'vyakto 'vyaktāt sanātanaḥ |
yaḥ sa sarveṣu bhūteṣu naśyatsu na vinaśyati ||8-20||

अव्यक्तो ऽक्षर इत्युक्तस्तमाहुः परमां गतिम् ।
यं प्राप्य न निवर्तन्ते तद्धाम परमं मम ॥८-२१॥

avyakto 'kṣara ity uktas tam āhuḥ paramāṃ gatim |
yaṃ prāpya na nivartante tad dhāma paramaṃ mama ||8-21||

पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया ।
यस्यान्तःस्थानि भूतानि येन सर्वमिदं ततम् ॥८-२२॥

puruṣaḥ sa paraḥ pārtha bhaktyā labhyas tv ananyayā |
yasyāntaḥsthāni bhūtāni yena sarvam idaṃ tatam ||8-22||

यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः ।
प्रयाता यान्ति तं कालं वक्ष्यामि भरतर्षभ ॥८-२३॥

yatra kāle tv anāvṛttim āvṛttiṃ caiva yoginaḥ |
prayātā yānti taṃ kālaṃ vakṣyāmi bharatarṣabha ||8-23||

अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम् ।
तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः ॥८-२४॥

agnir jyotir ahaḥ śuklaḥ ṣaṇmāsā uttarāyaṇam |
tatra prayātā gacchanti brahma brahmavido janāḥ ||8-24||

धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम् ।
तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्तते ॥८-२५॥

dhūmo rātris tathā kṛṣṇaḥ ṣaṇmāsā dakṣiṇāyanam |
tatra cāndramasaṃ jyotir yogī prāpya nivartate ||8-25||

शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते ।
एकया यात्यनावृत्तिमन्ययावर्तते पुनः ॥८-२६॥

śuklakṛṣṇe gatī hy ete jagataḥ śāśvate mate |
ekayā yāty anāvṛttim anyayāvartate punaḥ ||8-26||

नैते सृती पार्थ जानन्योगी मुह्यति कश्चन ।
तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जुन ॥८-२७॥

naite sṛtī pārtha jānan yogī muhyati kaś cana |
tasmāt sarveṣu kāleṣu yogayukto bhavārjuna ||8-27||

वेदेषु यज्ञेषु तपःसु चैव
दानेषु यत्पुण्यफलं प्रदिष्टम् ।
अत्येति तत्सर्वमिदं विदित्वा
योगी परं स्थानमुपैति चाद्यम् ॥८-२८॥

vedeṣu yajñeṣu tapaḥsu caiva; dāneṣu yat puṇyaphalaṃ pradiṣṭam |
atyeti tat sarvam idaṃ viditvā; yogī paraṃ sthānam upaiti cādyam ||8-28||

श्रीभगवानुवाच ।
इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे ।
ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसे ऽशुभात् ॥९-१॥

śrībhagavān uvāca |
idaṃ tu te guhyatamaṃ pravakṣyāmy anasūyave |
jñānaṃ vijñānasahitaṃ yaj jñātvā mokṣyase 'śubhāt ||9-1||

राजविद्या राजगुह्यं पवित्रमिदमुत्तमम् ।
प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तुमव्ययम् ॥९-२॥

rājavidyā rājaguhyaṃ pavitram idam uttamam |
pratyakṣāvagamaṃ dharmyaṃ susukhaṃ kartum avyayam ||9-2||



अश्रद्दधानाः पुरुषा धर्मस्यास्य परंतप ।
अप्राप्य मां निवर्तन्ते मृत्युसंसारवर्त्मनि ॥९-३॥

aśraddadhānāḥ puruṣā dharmasyāsya paraṃtapa |
aprāpya māṃ nivartante mṛtyusaṃsāravartmani ||9-3||

मया ततमिदं सर्वं जगदव्यक्तमूर्तिना ।
मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः ॥९-४॥

mayā tatam idaṃ sarvaṃ jagad avyaktamūrtinā |
matsthāni sarvabhūtāni na cāhaṃ teṣv avasthitaḥ ||9-4||

न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम् ।
भूतभृन्न च भूतस्थो ममात्मा भूतभावनः ॥९-५॥

na ca matsthāni bhūtāni paśya me yogam aiśvaram |
bhūtabhṛn na ca bhūtastho mamātmā bhūtabhāvanaḥ ||9-5||

यथाकाशस्थितो नित्यं वायुः सर्वत्रगो महान् ।
तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय ॥९-६॥

yathākāśasthito nityaṃ vāyuḥ sarvatrago mahān |
tathā sarvāṇi bhūtāni matsthānīty upadhāraya ||9-6||

सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम् ।
कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम् ॥९-७॥

sarvabhūtāni kaunteya prakṛtiṃ yānti māmikām |
kalpakṣaye punas tāni kalpādau visṛjāmy aham ||9-7||

प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः ।
भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात् ॥९-८॥

prakṛtiṃ svām avaṣṭabhya visṛjāmi punaḥ punaḥ |
bhūtagrāmam imaṃ kṛtsnam avaśaṃ prakṛter vaśāt ||9-8||

न च मां तानि कर्माणि निबध्नन्ति धनंजय ।
उदासीनवदासीनमसक्तं तेषु कर्मसु ॥९-९॥

na ca māṃ tāni karmāṇi nibadhnanti dhanaṃjaya |
udāsīnavad āsīnam asaktaṃ teṣu karmasu ||9-9||

मयाध्यक्षेण प्रकृतिः सूयते सचराचरम् ।
हेतुनानेन कौन्तेय जगद्विपरिवर्तते ॥९-१०॥

mayādhyakṣeṇa prakṛtiḥ sūyate sacarācaram |
hetunānena kaunteya jagad viparivartate ||9-10||

अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम् ।
परं भावमजानन्तो मम भूतमहेश्वरम् ॥९-११॥

avajānanti māṃ mūḍhā mānuṣīṃ tanum āśritam |
paraṃ bhāvam ajānanto mama bhūtamaheśvaram ||9-11||

मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः ।
राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः ॥९-१२॥

moghāśā moghakarmāṇo moghajñānā vicetasaḥ |
rākṣasīm āsurīṃ caiva prakṛtiṃ mohinīṃ śritāḥ ||9-12||

महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः ।
भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम् ॥९-१३॥

mahātmānas tu māṃ pārtha daivīṃ prakṛtim āśritāḥ |
bhajanty ananyamanaso jñātvā bhūtādim avyayam ||9-13||

सततं कीर्तयन्तो मां यतन्तश्च दृढव्रताः ।
नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते ॥९-१४॥

satataṃ kīrtayanto māṃ yatantaś ca dṛḍhavratāḥ |
namasyantaś ca māṃ bhaktyā nityayuktā upāsate ||9-14||

ज्ञानयज्ञेन चाप्यन्ये यजन्तो मामुपासते ।
एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम् ॥९-१५॥

jñānayajñena cāpy anye yajanto mām upāsate |
ekatvena pṛthaktvena bahudhā viśvatomukham ||9-15||

अहं क्रतुरहं यज्ञः स्वधाहमहमौषधम् ।
मन्त्रो ऽहमहमेवाज्यमहमग्निरहं हुतम् ॥९-१६॥

ahaṃ kratur ahaṃ yajñaḥ svadhāham aham auṣadham |
mantro 'ham aham evājyam aham agnir ahaṃ hutam ||9-16||



पिताहमस्य जगतो माता धाता पितामहः ।
वेद्यं पवित्रमोंकार ऋक्साम यजुरेव च ॥९-१७॥

pitāham asya jagato mātā dhātā pitāmahaḥ |
vedyaṃ pavitram oṃkāra ṛk sāma yajur eva ca ||9-17||

गतिर्भर्ता प्रभुः साक्षी निवासः शरणं सुहृत् ।
प्रभवः प्रलयः स्थानं निधानं बीजमव्ययम् ॥९-१८॥

gatir bhartā prabhuḥ sākṣī nivāsaḥ śaraṇaṃ suhṛt |
prabhavaḥ pralayaḥ sthānaṃ nidhānaṃ bījam avyayam ||9-18||

तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च ।
अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन ॥९-१९॥

tapāmy aham ahaṃ varṣaṃ nigṛhṇāmy utsṛjāmi ca |
amṛtaṃ caiva mṛtyuś ca sad asac cāham arjuna ||9-19||

त्रैविद्या मां सोमपाः पूतपापा
यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते ।
ते पुण्यमासाद्य सुरेन्द्रलोकम्
अश्नन्ति दिव्यान्दिवि देवभोगान् ॥९-२०॥

traividyā māṃ somapāḥ pūtapāpā; yajñair iṣṭvā svargatiṃ prārthayante |
te puṇyam āsādya surendralokam; aśnanti divyān divi devabhogān ||9-20||

ते तं भुक्त्वा स्वर्गलोकं विशालं
क्षीणे पुण्ये मर्त्यलोकं विशन्ति ।
एवं त्रयीधर्ममनुप्रपन्ना
गतागतं कामकामा लभन्ते ॥९-२१॥

te taṃ bhuktvā svargalokaṃ viśālaṃ; kṣīṇe puṇye martyalokaṃ viśanti |
evaṃ trayīdharmam anuprapannā; gatāgataṃ kāmakāmā labhante ||9-21||

अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते ।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥९-२२॥

ananyāś cintayanto māṃ ye janāḥ paryupāsate |
teṣāṃ nityābhiyuktānāṃ yogakṣemaṃ vahāmy aham ||9-22||

ये ऽप्यन्यदेवता भक्ता यजन्ते श्रद्धयान्विताः ।
ते ऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम् ॥९-२३॥

ye 'py anyadevatā bhaktā yajante śraddhayānvitāḥ |
te 'pi mām eva kaunteya yajanty avidhipūrvakam ||9-23||

अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च ।
न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते ॥९-२४॥

ahaṃ hi sarvayajñānāṃ bhoktā ca prabhur eva ca |
na tu mām abhijānanti tattvenātaś cyavanti te ||9-24||

यान्ति देवव्रता देवान्पितॄन्यान्ति पितृव्रताः ।
भूतानि यान्ति भूतेज्या यान्ति मद्याजिनो ऽपि माम् ॥९-२५॥

yānti devavratā devān pitṝn yānti pitṛvratāḥ |
bhūtāni yānti bhūtejyā yānti madyājino 'pi mām ||9-25||

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥९-२६॥

patraṃ puṣpaṃ phalaṃ toyaṃ yo me bhaktyā prayacchati |
tad ahaṃ bhaktyupahṛtam aśnāmi prayatātmanaḥ ||9-26||

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ॥९-२७॥

yat karoṣi yad aśnāsi yaj juhoṣi dadāsi yat |
yat tapasyasi kaunteya tat kuruṣva madarpaṇam ||9-27||

शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः ।
संन्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसि ॥९-२८॥

śubhāśubhaphalair evaṃ mokṣyase karmabandhanaiḥ |
saṃnyāsayogayuktātmā vimukto mām upaiṣyasi ||9-28||

समो ऽहं सर्वभूतेषु न मे द्वेष्यो ऽस्ति न प्रियः ।
ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम् ॥९-२९॥

samo 'haṃ sarvabhūteṣu na me dveṣyo 'sti na priyaḥ |
ye bhajanti tu māṃ bhaktyā mayi te teṣu cāpy aham ||9-29||



अपि चेत्सुदुराचारो भजते मामनन्यभाक् ।
साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः ॥९-३०॥

api cet sudurācāro bhajate mām ananyabhāk |
sādhur eva sa mantavyaḥ samyag vyavasito hi saḥ ||9-30||

क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति ।
कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति ॥९-३१॥

kṣipraṃ bhavati dharmātmā śaśvacchāntiṃ nigacchati |
kaunteya pratijānīhi na me bhaktaḥ praṇaśyati ||9-31||

मां हि पार्थ व्यपाश्रित्य ये ऽपि स्युः पापयोनयः ।
स्त्रियो वैश्यास्तथा शूद्रास्ते ऽपि यान्ति परां गतिम् ॥९-३२॥

māṃ hi pārtha vyapāśritya ye 'pi syuḥ pāpayonayaḥ |
striyo vaiśyās tathā śūdrās te 'pi yānti parāṃ gatim ||9-32||

किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा ।
अनित्यमसुखं लोकमिमं प्राप्य भजस्व माम् ॥९-३३॥

kiṃ punar brāhmaṇāḥ puṇyā bhaktā rājarṣayas tathā |
anityam asukhaṃ lokam imaṃ prāpya bhajasva mām ||9-33||

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः ॥९-३४॥

manmanā bhava madbhakto madyājī māṃ namaskuru |
mām evaiṣyasi yuktvaivam ātmānaṃ matparāyaṇaḥ ||9-34||

श्रीभगवानुवाच ।
भूय एव महाबाहो शृणु मे परमं वचः ।
यत्ते ऽहं प्रीयमाणाय वक्ष्यामि हितकाम्यया ॥१०-१॥

śrībhagavān uvāca |
bhūya eva mahābāho śṛṇu me paramaṃ vacaḥ |
yat te 'haṃ prīyamāṇāya vakṣyāmi hitakāmyayā ||10-1||

न मे विदुः सुरगणाः प्रभवं न महर्षयः ।
अहमादिर्हि देवानां महर्षीणां च सर्वशः ॥१०-२॥

na me viduḥ suragaṇāḥ prabhavaṃ na maharṣayaḥ |
aham ādir hi devānāṃ maharṣīṇāṃ ca sarvaśaḥ ||10-2||

यो मामजमनादिं च वेत्ति लोकमहेश्वरम् ।
असंमूढः स मर्त्येषु सर्वपापैः प्रमुच्यते ॥ १०-३ ॥

yo mām ajam anādiṃ ca vetti lokamaheśvaram |
asaṃmūḍhaḥ sa martyeṣu sarvapāpaiḥ pramucyate ||10-3||

बुद्धिर्ज्ञानमसंमोहः क्षमा सत्यं दमः शमः ।
सुखं दुःखं भवो ऽभावो भयं चाभयमेव च ॥ १०-४ ॥

buddhir jñānam asaṃmohaḥ kṣamā satyaṃ damaḥ śamaḥ |
sukhaṃ duḥkhaṃ bhavo 'bhāvo bhayaṃ cābhayam eva ca ||10-4||

अहिंसा समता तुष्टिस्तपो दानं यशो ऽयशः ।
भवन्ति भावा भूतानां मत्त एव पृथग्विधाः ॥ १०-५ ॥

ahiṃsā samatā tuṣṭis tapo dānaṃ yaśo 'yaśaḥ |
bhavanti bhāvā bhūtānāṃ matta eva pṛthagvidhāḥ ||10-5||

महर्षयः सप्त पूर्वे चत्वारो मनवस्तथा ।
मद्भावा मानसा जाता येषां लोक इमाः प्रजाः ॥ १०-६ ॥

maharṣayaḥ sapta pūrve catvāro manavas tathā |
madbhāvā mānasā jātā yeṣāṃ loka imāḥ prajāḥ ||10-6||

एतां विभूतिं योगं च मम यो वेत्ति तत्त्वतः ।
सो ऽविकम्पेन योगेन युज्यते नात्र संशयः ॥ १०-७ ॥

etāṃ vibhūtiṃ yogaṃ ca mama yo vetti tattvataḥ |
so 'vikampena yogena yujyate nātra saṃśayaḥ ||10-7||

अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते ।
इति मत्वा भजन्ते मां बुधा भावसमन्विताः ॥ १०-८ ॥

ahaṃ sarvasya prabhavo mattaḥ sarvaṃ pravartate |
iti matvā bhajante māṃ budhā bhāvasamanvitāḥ ||10-8||

मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम् ।
कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च ॥ १०-९ ॥

maccittā madgataprāṇā bodhayantaḥ parasparam |
kathayantaś ca māṃ nityaṃ tuṣyanti ca ramanti ca ||10-9||



तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥ १०-१० ॥

teṣāṃ satatayuktānāṃ bhajatāṃ prītipūrvakam |
dadāmi buddhiyogaṃ taṃ yena mām upayānti te ||10-10||

तेषामेवानुकम्पार्थमहमज्ञानजं तमः ।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥ १०-११ ॥

teṣām evānukampārtham aham ajñānajaṃ tamaḥ |
nāśayāmy ātmabhāvastho jñānadīpena bhāsvatā ||10-11||

अर्जुन उवाच ।
परं ब्रह्म परं धाम पवित्रं परमं भवान् ।
पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुम् ॥ १०-१२ ॥

arjuna uvāca |
paraṃ brahma paraṃ dhāma pavitraṃ paramaṃ bhavān |
puruṣaṃ śāśvataṃ divyam ādidevam ajaṃ vibhum ||10-12||

आहुस्त्वामृषयः सर्वे देवर्षिर्नारदस्तथा ।
असितो देवलो व्यासः स्वयं चैव ब्रवीषि मे ॥ १०-१३ ॥

āhus tvām ṛṣayaḥ sarve devarṣir nāradas tathā |
asito devalo vyāsaḥ svayaṃ caiva bravīṣi me ||10-13||

सर्वमेतदृतं मन्ये यन्मां वदसि केशव ।
न हि ते भगवन्व्यक्तिं विदुर्देवा न दानवाः ॥ १०-१४ ॥

sarvam etad ṛtaṃ manye yan māṃ vadasi keśava |
na hi te bhagavan vyaktiṃ vidur devā na dānavāḥ ||10-14||

स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम ।
भूतभावन भूतेश देवदेव जगत्पते ॥ १०-१५ ॥

svayam evātmanātmānaṃ vettha tvaṃ puruṣottama |
bhūtabhāvana bhūteśa devadeva jagatpate ||10-15||

वक्तुमर्हस्यशेषेण दिव्या ह्यात्मविभूतयः ।
याभिर्विभूतिभिर्लोकानिमांस्त्वं व्याप्य तिष्ठसि ॥ १०-१६ ॥

vaktum arhasy aśeṣeṇa divyā hy ātmavibhūtayaḥ |
yābhir vibhūtibhir lokān imāṃs tvaṃ vyāpya tiṣṭhasi ||10-16||

कथं विद्यामहं योगिंस्त्वां सदा परिचिन्तयन् ।
केषु केषु च भावेषु चिन्त्यो ऽसि भगवन्मया ॥१०-१७॥

kathaṃ vidyām ahaṃ yogiṃs tvāṃ sadā paricintayan |
keṣu keṣu ca bhāveṣu cintyo 'si bhagavan mayā ||10-17||

विस्तरेणात्मनो योगं विभूतिं च जनार्दन ।
भूयः कथय तृप्तिर्हि शृण्वतो नास्ति मे ऽमृतम् ॥१०-१८॥

vistareṇātmano yogaṃ vibhūtiṃ ca janārdana |
bhūyaḥ kathaya tṛptir hi śṛṇvato nāsti me 'mṛtam ||10-18||

श्रीभगवानुवाच ।
हन्त ते कथयिष्यामि दिव्या ह्यात्मविभूतयः ।
प्राधान्यतः कुरुश्रेष्ठ नास्त्यन्तो विस्तरस्य मे ॥१०-१९॥

śrībhagavān uvāca |
hanta te kathayiṣyāmi divyā hy ātmavibhūtayaḥ |
prādhānyataḥ kuruśreṣṭha nāsty anto vistarasya me ||10-19||

अहमात्मा गुडाकेश सर्वभूताशयस्थितः ।
अहमादिश्च मध्यं च भूतानामन्त एव च ॥१०-२०॥

aham ātmā guḍākeśa sarvabhūtāśayasthitaḥ |
aham ādiś ca madhyaṃ ca bhūtānām anta eva ca ||10-20||

आदित्यानामहं विष्णुर्ज्योतिषां रविरंशुमान् ।
मरीचिर्मरुतामस्मि नक्षत्राणामहं शशी ॥१०-२१॥

ādityānām ahaṃ viṣṇur jyotiṣāṃ ravir aṃśumān |
marīcir marutām asmi nakṣatrāṇām ahaṃ śaśī ||10-21||

वेदानां सामवेदो ऽस्मि देवानामस्मि वासवः ।
इन्द्रियाणां मनश्चास्मि भूतानामस्मि चेतना ॥१०-२२॥

vedānāṃ sāmavedo 'smi devānām asmi vāsavaḥ |
indriyāṇāṃ manaś cāsmi bhūtānām asmi cetanā ||10-22||

रुद्राणां शंकरश्चास्मि वित्तेशो यक्षरक्षसाम् ।
वसूनां पावकश्चास्मि मेरुः शिखरिणामहम् ॥१०-२३॥

rudrāṇāṃ śaṃkaraś cāsmi vitteśo yakṣarakṣasām |



vasūnāṃ pāvakaś cāsmi meruḥ śikhariṇām aham ||10-23||

पुरोधसां च मुख्यं मां विद्धि पार्थ बृहस्पतिम् ।
सेनानीनामहं स्कन्दः सरसामस्मि सागरः ॥१०-२४॥

purodhasāṃ ca mukhyaṃ māṃ viddhi pārtha bṛhaspatim |
senānīnām ahaṃ skandaḥ sarasām asmi sāgaraḥ ||10-24||

महर्षीणां भृगुरहं गिरामस्म्येकमक्षरम् ।
यज्ञानां जपयज्ञो ऽस्मि स्थावराणां हिमालयः ॥१०-२५॥

maharṣīṇāṃ bhṛgur ahaṃ girām asmy ekam akṣaram |
yajñānāṃ japayajño 'smi sthāvarāṇāṃ himālayaḥ ||10-25||

अश्वत्थः सर्ववृक्षाणां देवर्षीणां च नारदः ।
गन्धर्वाणां चित्ररथः सिद्धानां कपिलो मुनिः ॥१०-२६॥

aśvatthaḥ sarvavṛkṣāṇāṃ devarṣīṇāṃ ca nāradaḥ |
gandharvāṇāṃ citrarathaḥ siddhānāṃ kapilo muniḥ ||10-26||

उच्चैःश्रवसमश्वानां विद्धि माममृतोद्भवम् ।
ऐरावतं गजेन्द्राणां नराणां च नराधिपम् ॥१०-२७॥

uccaiḥśravasam aśvānāṃ viddhi mām amṛtodbhavam |
airāvataṃ gajendrāṇāṃ narāṇāṃ ca narādhipam ||10-27||

आयुधानामहं वज्रं धेनूनामस्मि कामधुक् ।
प्रजनश्चास्मि कन्दर्पः सर्पाणामस्मि वासुकिः ॥१०-२८॥

āyudhānām ahaṃ vajraṃ dhenūnām asmi kāmadhuk |
prajanaś cāsmi kandarpaḥ sarpāṇām asmi vāsukiḥ ||10-28||

अनन्तश्चास्मि नागानां वरुणो यादसामहम् ।
पितॄणामर्यमा चास्मि यमः संयमतामहम् ॥१०-२९॥

anantaś cāsmi nāgānāṃ varuṇo yādasām aham |
pitṝṇām aryamā cāsmi yamaḥ saṃyamatām aham ||10-29||

प्रह्लादश्चास्मि दैत्यानां कालः कलयतामहम् ।
मृगाणां च मृगेन्द्रो ऽहं वैनतेयश्च पक्षिणाम् ॥१०-३०॥

prahlādaś cāsmi daityānāṃ kālaḥ kalayatām aham |
mṛgāṇāṃ ca mṛgendro 'haṃ vainateyaś ca pakṣiṇām ||10-30||

पवनः पवतामस्मि रामः शस्त्रभृतामहम् ।
झषाणां मकरश्चास्मि स्रोतसामस्मि जाह्नवी ॥ १०-३१ ॥

pavanaḥ pavatām asmi rāmaḥ śastrabhṛtām aham |
jhaṣāṇāṃ makaraś cāsmi srotasām asmi jāhnavī ||10-31||

सर्गाणामादिरन्तश्च मध्यं चैवाहमर्जुन ।
अध्यात्मविद्या विद्यानां वादः प्रवदतामहम् ॥ १०-३२ ॥

sargāṇām ādir antaś ca madhyaṃ caivāham arjuna |
adhyātmavidyā vidyānāṃ vādaḥ pravadatām aham ||10-32||

अक्षराणामकारो ऽस्मि द्वंद्वः सामासिकस्य च ।
अहमेवाक्षयः कालो धाताहं विश्वतोमुखः ॥ १०-३३ ॥

akṣarāṇām akāro 'smi dvaṃdvaḥ sāmāsikasya ca |
aham evākṣayaḥ kālo dhātāhaṃ viśvatomukhaḥ ||10-33||

मृत्युः सर्वहरश्चाहमुद्भवश्च भविष्यताम् ।
कीर्तिः श्रीर्वाक्च नारीणां स्मृतिर्मेधा धृतिः क्षमा ॥ १०-३४ ॥

mṛtyuḥ sarvaharaś cāham udbhavaś ca bhaviṣyatām |
kīrtiḥ śrīr vāk ca nārīṇāṃ smṛtir medhā dhṛtiḥ kṣamā ||10-34||

बृहत्साम तथा साम्नां गायत्री छन्दसामहम् ।
मासानां मार्गशीर्षो ऽहमृतूनां कुसुमाकरः ॥ १०-३५ ॥

bṛhatsāma tathā sāmnāṃ gāyatrī chandasām aham |
māsānāṃ mārgaśīrṣo 'ham ṛtūnāṃ kusumākaraḥ ||10-35||

द्यूतं छलयतामस्मि तेजस्तेजस्विनामहम् ।
जयो ऽस्मि व्यवसायो ऽस्मि सत्त्वं सत्त्ववतामहम् ॥ १०-३६ ॥

dyūtaṃ chalayatām asmi tejas tejasvinām aham |
jayo 'smi vyavasāyo 'smi sattvaṃ sattvavatām aham ||10-36||

वृष्णीनां वासुदेवो ऽस्मि पाण्डवानां धनंजयः ।
मुनीनामप्यहं व्यासः कवीनामुशना कविः ॥ १०-३७ ॥

vṛṣṇīnāṃ vāsudevo 'smi pāṇḍavānāṃ dhanaṃjayaḥ |
munīnām apy ahaṃ vyāsaḥ kavīnām uśanā kaviḥ ||10-37||



दण्डो दमयतामस्मि नीतिरस्मि जिगीषताम् ।
मौनं चैवास्मि गुह्यानां ज्ञानं ज्ञानवतामहम् ॥ १०-३८ ॥

daṇḍo damayatām asmi nītir asmi jigīṣatām |
maunaṃ caivāsmi guhyānāṃ jñānaṃ jñānavatām aham ||10-38||

यच्चापि सर्वभूतानां बीजं तदहमर्जुन ।
न तदस्ति विना यत्स्यान्मया भूतं चराचरम् ॥ १०-३९ ॥

yac cāpi sarvabhūtānāṃ bījaṃ tad aham arjuna |
na tad asti vinā yat syān mayā bhūtaṃ carācaram ||10-39||

नान्तो ऽस्ति मम दिव्यानां विभूतीनां परंतप ।
एष तूद्देशतः प्रोक्तो विभूतेर्विस्तरो मया ॥ १०-४० ॥

nānto 'sti mama divyānāṃ vibhūtīnāṃ paraṃtapa |
eṣa tūddeśataḥ prokto vibhūter vistaro mayā ||10-40||

यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा ।
तत्तदेवावगच्छ त्वं मम तेजोंशसंभवम् ॥ १०-४१ ॥

yad yad vibhūtimat sattvaṃ śrīmad ūrjitam eva vā |
tat tad evāvagaccha tvaṃ mama tejoṃśasaṃbhavam ||10-41||

अथ वा बहुनैतेन किं ज्ञातेन तवार्जुन ।
विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ॥ १०-४२ ॥

atha vā bahunaitena kiṃ jñātena tavārjuna |
viṣṭabhyāham idaṃ kṛtsnam ekāṃśena sthito jagat ||10-42||

अर्जुन उवाच ।
मदनुग्रहाय परमं गुह्यमध्यात्मसंज्ञितम् ।
यत्त्वयोक्तं वचस्तेन मोहो ऽयं विगतो मम ॥ ११-१ ॥

arjuna uvāca |
madanugrahāya paramaṃ guhyam adhyātmasaṃjñitam |
yat tvayoktaṃ vacas tena moho 'yaṃ vigato mama ||11-1||

भवाप्ययौ हि भूतानां श्रुतौ विस्तरशो मया ।
त्वत्तः कमलपत्राक्ष माहात्म्यमपि चाव्ययम् ॥ ११-२ ॥

bhavāpyayau hi bhūtānāṃ śrutau vistaraśo mayā |
tvattaḥ kamalapatrākṣa māhātmyam api cāvyayam ||11-2||

एवमेतद्यथात्थ त्वमात्मानं परमेश्वर ।
द्रष्टुमिच्छामि ते रूपमैश्वरं पुरुषोत्तम ॥ ११-३ ॥

evam etad yathāttha tvam ātmānaṃ parameśvara ।
draṣṭum icchāmi te rūpam aiśvaraṃ puruṣottama ॥11-3॥

मन्यसे यदि तच्छक्यं मया द्रष्टुमिति प्रभो ।
योगेश्वर ततो मे त्वं दर्शयात्मानमव्ययम् ॥ ११-४ ॥

manyase yadi tac chakyaṃ mayā draṣṭum iti prabho ।
yogeśvara tato me tvaṃ darśayātmānam avyayam ॥11-4॥

श्रीभगवानुवाच ।
पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः ।
नानाविधानि दिव्यानि नानावर्णाकृतीनि च ॥ ११-५ ॥

śrībhagavān uvāca ।
paśya me pārtha rūpāṇi śataśo 'tha sahasraśaḥ ।
nānāvidhāni divyāni nānāvarṇākṛtīni ca ॥11-5॥

पश्यादित्यान्वसून्रुद्रानश्विनौ मरुतस्तथा ।
बहून्यदृष्टपूर्वाणि पश्याश्चर्याणि भारत ॥ ११-६ ॥

paśyādityān vasūn rudrān aśvinau marutas tathā ।
bahūny adṛṣṭapūrvāṇi paśyāścaryāṇi bhārata ॥11-6॥

इहैकस्थं जगत्कृत्स्नं पश्याद्य सचराचरम् ।
मम देहे गुडाकेश यच्चान्यद्द्रष्टुमिच्छसि ॥ ११-७ ॥

ihaikasthaṃ jagat kṛtsnaṃ paśyādya sacarācaram ।
mama dehe guḍākeśa yac cānyad draṣṭum icchasi ॥11-7॥

न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा ।
दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम् ॥ ११-८ ॥

na tu māṃ śakyase draṣṭum anenaiva svacakṣuṣā ।
divyaṃ dadāmi te cakṣuḥ paśya me yogam aiśvaram ॥11-8॥



संजय उवाच ।
एवमुक्त्वा ततो राजन्महायोगेश्वरो हरिः ।
दर्शयामास पार्थाय परमं रूपमैश्वरम् ॥ ११-९ ॥

saṃjaya uvāca ।
evam uktvā tato rājan mahāyogeśvaro hariḥ ।
darśayām āsa pārthāya paramaṃ rūpam aiśvaram ॥11-9॥

अनेकवक्त्रनयनमनेकाद्भुतदर्शनम् ।
अनेकदिव्याभरणं दिव्यानेकोद्यतायुधम् ॥ ११-१० ॥

anekavaktranayanam anekādbhutadarśanam ।
anekadivyābharaṇaṃ divyānekodyatāyudham ॥11-10॥

दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनम् ।
सर्वाश्चर्यमयं देवमनन्तं विश्वतोमुखम् ॥ ११-११ ॥

divyamālyāmbaradharaṃ divyagandhānulepanam ।
sarvāścaryamayaṃ devam anantaṃ viśvatomukham ॥11-11॥

दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थिता ।
यदि भाः सदृशी सा स्याद्भासस्तस्य महात्मनः ॥ ११-१२ ॥

divi sūryasahasrasya bhaved yugapad utthitā ।
yadi bhāḥ sadṛśī sā syād bhāsas tasya mahātmanaḥ ॥11-12॥

तत्रैकस्थं जगत्कृत्स्नं प्रविभक्तमनेकधा ।
अपश्यद्देवदेवस्य शरीरे पाण्डवस्तदा ॥ ११-१३ ॥

tatraikasthaṃ jagat kṛtsnaṃ pravibhaktam anekadhā ।
apaśyad devadevasya śarīre pāṇḍavas tadā ॥11-13॥

ततः स विस्मयाविष्टो हृष्टरोमा धनंजयः ।
प्रणम्य शिरसा देवं कृताञ्जलिरभाषत ॥ ११-१४ ॥

tataḥ sa vismayāviṣṭo hṛṣṭaromā dhanaṃjayaḥ ।
praṇamya śirasā devaṃ kṛtāñjalir abhāṣata ॥11-14॥

अर्जुन उवाच ।
पश्यामि देवांस्तव देव देहे
सर्वांस्तथा भूतविशेषसंघान् ।
ब्रह्माणमीशं कमलासनस्थम्
ऋषींश्च सर्वानुरगांश्च दिव्यान् ॥ ११-१५ ॥

arjuna uvāca |
paśyāmi devāṃs tava deva dehe; sarvāṃs tathā bhūtaviśeṣasaṃghān |
brahmāṇam īśaṃ kamalāsanastham; ṛṣīṃś ca sarvān uragāṃś ca divyān ||11-15||

अनेकबाहूदरवक्त्रनेत्रं
पश्यामि त्वा सर्वतो ऽनन्तरूपम् ।
नान्तं न मध्यं न पुनस्तवादिं
पश्यामि विश्वेश्वर विश्वरूप ॥ ११-१६ ॥

anekabāhūdaravaktranetraṃ; paśyāmi tvā sarvato 'nantarūpam |
nāntaṃ na madhyaṃ na punas tavādiṃ; paśyāmi viśveśvara viśvarūpa ||11-16||

किरीटिनं गदिनं चक्रिणं च
तेजोराशिं सर्वतो दीप्तिमन्तम् ।
पश्यामि त्वां दुर्निरीक्ष्यं समन्ताद्
दीप्तानलार्कद्युतिमप्रमेयम् ॥ ११-१७ ॥

kirīṭinaṃ gadinaṃ cakriṇaṃ ca; tejorāśiṃ sarvato dīptimantam |
paśyāmi tvāṃ durnirīkṣyaṃ samantād; dīptānalārkadyutim aprameyam ||11-17||

त्वमक्षरं परमं वेदितव्यं
त्वमस्य विश्वस्य परं निधानम् ।
त्वमव्ययः शाश्वतधर्मगोप्ता
सनातनस्त्वं पुरुषो मतो मे ॥ ११-१८ ॥

tvam akṣaraṃ paramaṃ veditavyaṃ; tvam asya viśvasya paraṃ nidhānam |
tvam avyayaḥ śāśvatadharmagoptā; sanātanas tvaṃ puruṣo mato me ||11-18||



अनादिमध्यान्तमनन्तवीर्यम्
अनन्तबाहुं शशिसूर्यनेत्रम् ।
पश्यामि त्वां दीप्तहुताशवक्त्रं
स्वतेजसा विश्वमिदं तपन्तम् ॥ ११-१९ ॥

anādimadhyāntam anantavīryam; anantabāhuṃ śaśisūryanetram |
paśyāmi tvāṃ dīptahutāśavaktraṃ; svatejasā viśvam idaṃ tapantam ||11-19||

द्यावापृथिव्योरिदमन्तरं हि
व्याप्तं त्वयैकेन दिशश्च सर्वाः ।
दृष्ट्वाद्भुतं रूपमिदं तवोग्रं
लोकत्रयं प्रव्यथितं महात्मन् ॥ ११-२० ॥

dyāvāpṛthivyor idam antaraṃ hi; vyāptaṃ tvayaikena diśaś ca sarvāḥ |
dṛṣṭvādbhutaṃ rūpam idaṃ tavograṃ; lokatrayaṃ pravyathitaṃ mahātman ||11-20||

अमी हि त्वा सुरसंघा विशन्ति
के चिद्भीताः प्राञ्जलयो गृणन्ति ।
स्वस्तीत्युक्त्वा महर्षिसिद्धसंघाः
स्तुवन्ति त्वां स्तुतिभिः पुष्कलाभिः ॥ ११-२१ ॥

amī hi tvā surasaṃghā viśanti; ke cid bhītāḥ prāñjalayo gṛṇanti |
svastīty uktvā maharṣisiddhasaṃghāḥ; stuvanti tvāṃ stutibhiḥ puṣkalābhiḥ ||11-21||

रुद्रादित्या वसवो ये च साध्या
विश्वे ऽश्विनौ मरुतश्चोष्मपाश्च ।
गन्धर्वयक्षासुरसिद्धसंघा
वीक्षन्ते त्वा विस्मिताश्चैव सर्वे ॥ ११-२२ ॥

rudrādityā vasavo ye ca sādhyā; viśve 'śvinau marutaś coṣmapāś ca |
gandharvayakṣāsurasiddhasaṃghā; vīkṣante tvā vismitāś caiva sarve ||11-22||

रूपं महत्ते बहुवक्त्रनेत्रं
महाबाहो बहुबाहूरुपादम् ।
बहूदरं बहुदंष्ट्राकरालं
दृष्ट्वा लोकाः प्रव्यथितास्तथाहम् ॥ ११-२३ ॥

rūpaṃ mahat te bahuvaktranetraṃ; mahābāho bahubāhūrupādam |
bahūdaraṃ bahudaṃṣṭrākarālaṃ; dṛṣṭvā lokāḥ pravyathitās tathāham ||11-23||

नभःस्पृशं दीप्तमनेकवर्णं
व्यात्ताननं दीप्तविशालनेत्रम् ।
दृष्ट्वा हि त्वां प्रव्यथितान्तरात्मा
धृतिं न विन्दामि शमं च विष्णो ॥ ११-२४ ॥

nabhaḥspṛśaṃ dīptam anekavarṇaṃ; vyāttānanaṃ dīptaviśālanetram |
dṛṣṭvā hi tvāṃ pravyathitāntarātmā; dhṛtiṃ na vindāmi śamaṃ ca viṣṇo ||11-24||

दंष्ट्राकरालानि च ते मुखानि
दृष्ट्वैव कालानलसंनिभानि ।
दिशो न जाने न लभे च शर्म
प्रसीद देवेश जगन्निवास ॥ ११-२५ ॥

daṃṣṭrākarālāni ca te mukhāni; dṛṣṭvaiva kālānalasaṃnibhāni |
diśo na jāne na labhe ca śarma; prasīda deveśa jagannivāsa ||11-25||

अमी च त्वां धृतराष्ट्रस्य पुत्राः
सर्वे सहैवावनिपालसंघैः ।
भीष्मो द्रोणः सूतपुत्रस्तथासौ
सहास्मदीयैरपि योधमुख्यैः ॥ ११-२६ ॥

amī ca tvāṃ dhṛtarāṣṭrasya putrāḥ; sarve sahaivāvanipālasaṃghaiḥ |
bhīṣmo droṇaḥ sūtaputras tathāsau; sahāsmadīyair api yodhamukhyaiḥ ||11-26||



वक्त्राणि ते त्वरमाणा विशन्ति
दंष्ट्राकरालानि भयानकानि ।
केचिद्विलग्ना दशनान्तरेषु
संदृश्यन्ते चूर्णितैरुत्तमाङ्गैः ॥ ११-२७ ॥

vaktrāṇi te tvaramāṇā viśanti; daṃṣṭrākarālāni bhayānakāni |
ke cid vilagnā daśanāntareṣu; saṃdṛśyante cūrṇitair uttamāṅgaiḥ ||11-27||

यथा नदीनां बहवो ऽम्बुवेगाः
समुद्रमेवाभिमुखा द्रवन्ति ।
तथा तवामी नरलोकवीरा
विशन्ति वक्त्राण्यभिविज्वलन्ति ॥ ११-२८ ॥

yathā nadīnāṃ bahavo 'mbuvegāḥ; samudram evābhimukhā dravanti |
tathā tavāmī naralokavīrā; viśanti vaktrāṇy abhivijvalanti ||11-28||

यथा प्रदीप्तं ज्वलनं पतंगा
विशन्ति नाशाय समृद्धवेगाः ।
तथैव नाशाय विशन्ति लोकास्
तवापि वक्त्राणि समृद्धवेगाः ॥ ११-२९ ॥

yathā pradīptaṃ jvalanaṃ pataṃgā; viśanti nāśāya samṛddhavegāḥ |
tathaiva nāśāya viśanti lokās; tavāpi vaktrāṇi samṛddhavegāḥ ||11-29||

लेलिह्यसे ग्रसमानः समन्ताल्
लोकान्समग्रान्वदनैर्ज्वलद्भिः ।
तेजोभिरापूर्य जगत्समग्रं
भासस्तवोग्राः प्रतपन्ति विष्णो ॥ ११-३० ॥

lelihyase grasamānaḥ samantāl; lokān samagrān vadanair jvaladbhiḥ |
tejobhir āpūrya jagat samagraṃ; bhāsas tavogrāḥ pratapanti viṣṇo ||11-30||

आख्याहि मे को भवानुग्ररूपो
नमो ऽस्तु ते देववर प्रसीद ।
विज्ञातुमिच्छामि भवन्तमाद्यं
न हि प्रजानामि तव प्रवृत्तिम् ॥ ११-३१ ॥

ākhyāhi me ko bhavān ugrarūpo; namo 'stu te devavara prasīda |
vijñātum icchāmi bhavantam ādyaṃ; na hi prajānāmi tava pravṛttim ||11-31||

श्रीभगवानुवाच ।
कालो ऽस्मि लोकक्षयकृत्प्रवृद्धो
लोकान्समाहर्तुमिह प्रवृत्तः ।
ऋते ऽपि त्वा न भविष्यन्ति सर्वे
ये ऽवस्थिताः प्रत्यनीकेषु योधाः ॥ ११-३२ ॥

śrībhagavān uvāca |
kālo 'smi lokakṣayakṛt pravṛddho; lokān samāhartum iha pravṛttaḥ |
ṛte 'pi tvā na bhaviṣyanti sarve; ye 'vasthitāḥ pratyanīkeṣu yodhāḥ ||11-32||

तस्मात्त्वमुत्तिष्ठ यशो लभस्व
जित्वा शत्रून्भुङ्क्ष्व राज्यं समृद्धम् ।
मयैवैते निहताः पूर्वमेव
निमित्तमात्रं भव सव्यसाचिन् ॥ ११-३३ ॥

tasmāt tvam uttiṣṭha yaśo labhasva; jitvā śatrūn bhuṅkṣva rājyaṃ samṛddham |
mayaivaite nihatāḥ pūrvam eva; nimittamātraṃ bhava savyasācin ||11-33||

द्रोणं च भीष्मं च जयद्रथं च
कर्णं तथान्यानपि योधवीरान् ।
मया हतांस्त्वं जहि मा व्यथिष्ठा
युध्यस्व जेतासि रणे सपत्नान् ॥ ११-३४ ॥

droṇaṃ ca bhīṣmaṃ ca jayadrathaṃ ca; karṇaṃ tathānyān api yodhavīrān |
mayā hatāṃs tvaṃ jahi mā vyathiṣṭhā; yudhyasva jetāsi raṇe sapatnān ||11-34||



संजय उवाच ।
एतच्छ्रुत्वा वचनं केशवस्य
कृताञ्जलिर्वेपमानः किरीटी ।
नमस्कृत्वा भूय एवाह कृष्णं
सगद्गदं भीतभीतः प्रणम्य ॥ ११-३५ ॥

saṃjaya uvāca |
etac chrutvā vacanaṃ keśavasya; kṛtāñjalir vepamānaḥ kirīṭī |
namaskṛtvā bhūya evāha kṛṣṇaṃ; sagadgadaṃ bhītabhītaḥ praṇamya ||11-35||

अर्जुन उवाच ।
स्थाने हृषीकेश तव प्रकीर्त्या
जगत्प्रहृष्यत्यनुरज्यते च ।
रक्षांसि भीतानि दिशो द्रवन्ति
सर्वे नमस्यन्ति च सिद्धसंघाः ॥ ११-३६ ॥

arjuna uvāca |
sthāne hṛṣīkeśa tava prakīrtyā; jagat prahṛṣyaty anurajyate ca |
rakṣāṃsi bhītāni diśo dravanti; sarve namasyanti ca siddhasaṃghāḥ ||11-36||

कस्माच्च ते न नमेरन्महात्मन्
गरीयसे ब्रह्मणो ऽप्यादिकर्त्रे ।
अनन्त देवेश जगन्निवास
त्वमक्षरं सदसत्तत्परं यत् ॥ ११-३७ ॥

kasmāc ca te na nameran mahātman; garīyase brahmaṇo 'py ādikartre |
ananta deveśa jagannivāsa; tvam akṣaraṃ sad asat tatparaṃ yat ||11-37||

त्वमादिदेवः पुरुषः पुराणस्
त्वमस्य विश्वस्य परं निधानम् ।
वेत्तासि वेद्यं च परं च धाम
त्वया ततं विश्वमनन्तरूप ॥ ११-३८ ॥

tvam ādidevaḥ puruṣaḥ purāṇas; tvam asya viśvasya paraṃ nidhānam |
vettāsi vedyaṃ ca paraṃ ca dhāma; tvayā tataṃ viśvam anantarūpa ||11-38||

वायुर्यमो ऽग्निर्वरुणः शशाङ्कः
प्रजापतिस्त्वं प्रपितामहश्च ।
नमो नमस्ते ऽस्तु सहस्रकृत्वः
पुनश्च भूयो ऽपि नमो नमस्ते ॥ ११-३९ ॥

vāyur yamo 'gnir varuṇaḥ śaśāṅkaḥ; prajāpatis tvaṃ prapitāmahaś ca |
namo namas te 'stu sahasrakṛtvaḥ; punaś ca bhūyo 'pi namo namas te ||11-39||

नमः पुरस्तादथ पृष्ठतस्ते
नमो ऽस्तु ते सर्वत एव सर्व ।
अनन्तवीर्यामितविक्रमस्त्वं
सर्वं समाप्नोषि ततो ऽसि सर्वः ॥ ११-४० ॥

namaḥ purastād atha pṛṣṭhatas te; namo 'stu te sarvata eva sarva |
anantavīryāmitavikramas tvaṃ; sarvaṃ samāpnoṣi tato 'si sarvaḥ ||11-40||

सखेति मत्वा प्रसभं यदुक्तं
हे कृष्ण हे यादव हे सखेति ।
अजानता महिमानं तवेदं
मया प्रमादात्प्रणयेन वापि ॥ ११-४१ ॥

sakheti matvā prasabhaṃ yad uktaṃ; he kṛṣṇa he yādava he sakheti |
ajānatā mahimānaṃ tavedaṃ; mayā pramādāt praṇayena vāpi ||11-41||

यच्चावहासार्थमसत्कृतो ऽसि
विहारशय्यासनभोजनेषु ।
एको ऽथ वाप्यच्युत तत्समक्षं
तत्क्षामये त्वामहमप्रमेयम् ॥ ११-४२ ॥

yac cāvahāsārtham asatkṛto 'si; vihāraśayyāsanabhojaneṣu |
eko 'tha vāpy acyuta tatsamakṣaṃ; tat kṣāmaye tvām aham aprameyam ||11-42||



पितासि लोकस्य चराचरस्य
त्वमस्य पूज्यश्च गुरुर्गरीयान् ।
न त्वत्समो ऽस्त्यभ्यधिकः कुतो ऽन्यो
लोकत्रये ऽप्यप्रतिमप्रभाव ॥ ११-४३ ॥

pitāsi lokasya carācarasya; tvam asya pūjyaś ca gurur garīyān |
na tvatsamo 'sty abhyadhikaḥ kuto 'nyo; lokatraye 'py apratimaprabhāva ||11-43||

तस्मात्प्रणम्य प्रणिधाय कायं
प्रसादये त्वामहमीशमीड्यम् ।
पितेव पुत्रस्य सखेव सख्युः
प्रियः प्रियायार्हसि देव सोढुम् ॥ ११-४४ ॥

tasmāt praṇamya praṇidhāya kāyaṃ; prasādaye tvām aham īśam īḍyam |
piteva putrasya sakheva sakhyuḥ; priyaḥ priyāyārhasi deva soḍhum ||11-44||

अदृष्टपूर्वं हृषितो ऽस्मि दृष्ट्वा
भयेन च प्रव्यथितं मनो मे ।
तदेव मे दर्शय देव रूपं
प्रसीद देवेश जगन्निवास ॥ ११-४५ ॥

adṛṣṭapūrvaṃ hṛṣito 'smi dṛṣṭvā; bhayena ca pravyathitaṃ mano me |
tad eva me darśaya deva rūpaṃ; prasīda deveśa jagannivāsa ||11-45||

किरीटिनं गदिनं चक्रहस्तम्
इच्छामि त्वां द्रष्टुमहं तथैव ।
तेनैव रूपेण चतुर्भुजेन
सहस्रबाहो भव विश्वमूर्ते ॥ ११-४६ ॥

kirīṭinaṃ gadinaṃ cakrahastam; icchāmi tvāṃ draṣṭum ahaṃ tathaiva |
tenaiva rūpeṇa caturbhujena; sahasrabāho bhava viśvamūrte ||11-46||

श्रीभगवानुवाच ।
मया प्रसन्नेन तवार्जुनेदं
रूपं परं दर्शितमात्मयोगात् ।
तेजोमयं विश्वमनन्तमाद्यं
यन्मे त्वदन्येन न दृष्टपूर्वम् ॥ ११-४७॥

śrībhagavān uvāca |
mayā prasannena tavārjunedaṃ; rūpaṃ paraṃ darśitam ātmayogāt |
tejomayaṃ viśvam anantam ādyaṃ; yan me tvad anyena na dṛṣṭapūrvam ||11-47||

न वेदयज्ञाध्ययनैर्न दानैर्
न च क्रियाभिर्न तपोभिरुग्रैः ।
एवंरूपः शक्य अहं नृलोके
द्रष्टुं त्वदन्येन कुरुप्रवीर ॥ ११-४८॥

na vedayajñādhyayanair na dānair; na ca kriyābhir na tapobhir ugraiḥ |
evaṃrūpaḥ śakya ahaṃ nṛloke; draṣṭuṃ tvad anyena kurupravīra ||11-48||

मा ते व्यथा मा च विमूढभावो
दृष्ट्वा रूपं घोरमीदृङ्ममेदम् ।
व्यपेतभीः प्रीतमनाः पुनस्त्वं
तदेव मे रूपमिदं प्रपश्य ॥ ११-४९॥

mā te vyathā mā ca vimūḍhabhāvo; dṛṣṭvā rūpaṃ ghoram īdṛṅ mamedam |
vyapetabhīḥ prītamanāḥ punas tvaṃ; tad eva me rūpam idaṃ prapaśya ||11-49||

संजय उवाच ।
इत्यर्जुनं वासुदेवस्तथोक्त्वा
स्वकं रूपं दर्शयामास भूयः ।
आश्वासयामास च भीतमेनं
भूत्वा पुनः सौम्यवपुर्महात्मा ॥ ११-५०॥

saṃjaya uvāca |
ity arjunaṃ vāsudevas tathoktvā; svakaṃ rūpaṃ darśayām āsa bhūyaḥ |
āśvāsayām āsa ca bhītam enaṃ; bhūtvā punaḥ saumyavapur mahātmā ||11-50||



अर्जुन उवाच ।
दृष्ट्वेदं मानुषं रूपं तव सौम्यं जनार्दन ।
इदानीमस्मि संवृत्तः सचेताः प्रकृतिं गतः ॥ ११-५१॥

arjuna uvāca |
dṛṣṭvedaṃ mānuṣaṃ rūpaṃ tava saumyaṃ janārdana |
idānīm asmi saṃvṛttaḥ sacetāḥ prakṛtiṃ gataḥ ||11-51||

श्रीभगवानुवाच ।
सुदुर्दर्शमिदं रूपं दृष्टवानसि यन्मम ।
देवा अप्यस्य रूपस्य नित्यं दर्शनकाङ्क्षिणः ॥ ११-५२॥

śrībhagavān uvāca |
sudurdarśam idaṃ rūpaṃ dṛṣṭavān asi yan mama |
devā apy asya rūpasya nityaṃ darśanakāṅkṣiṇaḥ ||11-52||

नाहं वेदैर्न तपसा न दानेन न चेज्यया ।
शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा ॥ ११-५३॥

nāhaṃ vedair na tapasā na dānena na cejyayā |
śakya evaṃvidho draṣṭuṃ dṛṣṭavān asi māṃ yathā ||11-53||

भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन ।
ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप ॥ ११-५४॥

bhaktyā tv ananyayā śakya aham evaṃvidho 'rjuna |
jñātuṃ draṣṭuṃ ca tattvena praveṣṭuṃ ca paraṃtapa ||11-54||

मत्कर्मकृन्मत्परमो मद्भक्तः सङ्गवर्जितः ।
निर्वैरः सर्वभूतेषु यः स मामेति पाण्डव ॥ ११-५५॥

matkarmakṛn matparamo madbhaktaḥ saṅgavarjitaḥ |
nirvairaḥ sarvabhūteṣu yaḥ sa mām eti pāṇḍava ||11-55||

अर्जुन उवाच ।
एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते ।
ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः ॥ १२-१ ॥

arjuna uvāca |
evaṃ satatayuktā ye bhaktās tvāṃ paryupāsate |
ye cāpy akṣaram avyaktaṃ teṣāṃ ke yogavittamāḥ ||12-1||

श्रीभगवानुवाच ।
मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते ।
श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ॥१२-२॥

śrībhagavān uvāca |
mayy āveśya mano ye māṃ nityayuktā upāsate |
śraddhayā parayopetās te me yuktatamā matāḥ ||12-2||

ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते ।
सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम् ॥१२-३॥

ye tv akṣaram anirdeśyam avyaktaṃ paryupāsate |
sarvatragam acintyaṃ ca kūṭastham acalaṃ dhruvam ||12-3||

संनियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः ।
ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः ॥१२-४॥

saṃniyamyendriyagrāmaṃ sarvatra samabuddhayaḥ |
te prāpnuvanti mām eva sarvabhūtahite ratāḥ ||12-4||

क्लेशो ऽधिकतरस्तेषामव्यक्तासक्तचेतसाम् ।
अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ॥१२-५॥

kleśo 'dhikataras teṣām avyaktāsaktacetasām |
avyaktā hi gatir duḥkhaṃ dehavadbhir avāpyate ||12-5||

ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः ।
अनन्येनैव योगेन मां ध्यायन्त उपासते ॥१२-६॥

ye tu sarvāṇi karmāṇi mayi saṃnyasya matparāḥ |
ananyenaiva yogena māṃ dhyāyanta upāsate ||12-6||

तेषामहं समुद्धर्ता मृत्युसंसारसागरात् ।
भवामि नचिरात्पार्थ मय्यावेशितचेतसाम् ॥१२-७॥

teṣām ahaṃ samuddhartā mṛtyusaṃsārasāgarāt |
bhavāmi nacirāt pārtha mayy āveśitacetasām ||12-7||

मय्येव मन आधत्स्व मयि बुद्धिं निवेशय ।
निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः ॥१२-८॥

mayy eva mana ādhatsva mayi buddhiṃ niveśaya |



nivasiṣyasi mayy eva ata ūrdhvaṃ na saṃśayaḥ ||12-8||

अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम् ।
अभ्यासयोगेन ततो मामिच्छाप्तुं धनंजय ॥१२-९॥

atha cittaṃ samādhātuṃ na śaknoṣi mayi sthiram |
abhyāsayogena tato mām icchāptuṃ dhanaṃjaya ||12-9||

अभ्यासे ऽप्यसमर्थो ऽसि मत्कर्मपरमो भव ।
मदर्थमपि कर्माणि कुर्वन्सिद्धिमवाप्स्यसि ॥१२-१०॥

abhyāse 'py asamartho 'si matkarmaparamo bhava |
madartham api karmāṇi kurvan siddhim avāpsyasi ||12-10||

अथैतदप्यशक्तो ऽसि कर्तुं मद्योगमाश्रितः ।
सर्वकर्मफलत्यागं ततः कुरु यतात्मवान् ॥१२-११॥

athaitad apy aśakto 'si kartuṃ madyogam āśritaḥ |
sarvakarmaphalatyāgaṃ tataḥ kuru yatātmavān ||12-11||

श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाद्ध्यानं विशिष्यते ।
ध्यानात्कर्मफलत्यागस्त्यागाच्छान्तिरनन्तरम् ॥१२-१२॥

śreyo hi jñānam abhyāsāj jñānād dhyānaṃ viśiṣyate |
dhyānāt karmaphalatyāgas tyāgāc chāntir anantaram ||12-12||

अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च ।
निर्ममो निरहंकारः समदुःखसुखः क्षमी ॥१२-१३॥

adveṣṭā sarvabhūtānāṃ maitraḥ karuṇa eva ca |
nirmamo nirahaṃkāraḥ samaduḥkhasukhaḥ kṣamī ||12-13||

संतुष्टः सततं योगी यतात्मा दृढनिश्चयः ।
मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः ॥१२-१४॥

saṃtuṣṭaḥ satataṃ yogī yatātmā dṛḍhaniścayaḥ |
mayy arpitamanobuddhir yo madbhaktaḥ sa me priyaḥ ||12-14||

यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः ।
हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः ॥१२-१५॥

yasmān nodvijate loko lokān nodvijate ca yaḥ |
harṣāmarṣabhayodvegair mukto yaḥ sa ca me priyaḥ ||12-15||

अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः ।
सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः ॥१२-१६॥

anapekṣaḥ śucir dakṣa udāsīno gatavyathaḥ |
sarvārambhaparityāgī yo madbhaktaḥ sa me priyaḥ ||12-16||

यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति ।
शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः ॥१२-१७॥

yo na hṛṣyati na dveṣṭi na śocati na kāṅkṣati |
śubhāśubhaparityāgī bhaktimān yaḥ sa me priyaḥ ||12-17||

समः शत्रौ च मित्रे च तथा मानावमानयोः ।
शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः ॥१२-१८॥

samaḥ śatrau ca mitre ca tathā mānāvamānayoḥ |
śītoṣṇasukhaduḥkheṣu samaḥ saṅgavivarjitaḥ ||12-18||

तुल्यनिन्दास्तुतिर्मौनी संतुष्टो येन केन चित् ।
अनिकेतः स्थिरमतिर्भक्तिमान्मे प्रियो नरः ॥१२-१९॥

tulyanindāstutir maunī saṃtuṣṭo yena kena cit |
aniketaḥ sthiramatir bhaktimān me priyo naraḥ ||12-19||

ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते ।
श्रद्दधाना मत्परमा भक्तास्ते ऽतीव मे प्रियाः ॥१२-२०॥

ye tu dharmyāmṛtam idaṃ yathoktaṃ paryupāsate |
śraddadhānā matparamā bhaktās te 'tīva me priyāḥ ||12-20||

श्रीभगवानुवाच ।
इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते ।
एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः ॥१३-१॥

śrībhagavān uvāca |
idaṃ śarīraṃ kaunteya kṣetram ity abhidhīyate |
etad yo vetti taṃ prāhuḥ kṣetrajña iti tadvidaḥ ||13-1||

क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत ।
क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम ॥१३-२॥

kṣetrajñaṃ cāpi māṃ viddhi sarvakṣetreṣu bhārata |
kṣetrakṣetrajñayor jñānaṃ yat taj jñānaṃ mataṃ mama ||13-2||



तत्क्षेत्रं यच्च यादृक्च यद्विकारि यतश्च यत् ।
स च यो यत्प्रभावश्च तत्समासेन मे शृणु ॥१३-३॥

tat kṣetraṃ yac ca yādṛk ca yadvikāri yataś ca yat |
sa ca yo yatprabhāvaś ca tat samāsena me śṛṇu ||13-3||

ऋषिभिर्बहुधा गीतं छन्दोभिर्विविधैः पृथक् ।
ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः ॥१३-४॥

ṛṣibhir bahudhā gītaṃ chandobhir vividhaiḥ pṛthak |
brahmasūtrapadaiś caiva hetumadbhir viniścitaiḥ ||13-4||

महाभूतान्यहंकारो बुद्धिरव्यक्तमेव च ।
इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचराः ॥१३-५॥

mahābhūtāny ahaṃkāro buddhir avyaktam eva ca |
indriyāṇi daśaikaṃ ca pañca cendriyagocarāḥ ||13-5||

इच्छा द्वेषः सुखं दुःखं संघातश्चेतना धृतिः ।
एतत्क्षेत्रं समासेन सविकारमुदाहृतम् ॥१३-६॥

icchā dveṣaḥ sukhaṃ duḥkhaṃ saṃghātaś cetanā dhṛtiḥ |
etat kṣetraṃ samāsena savikāram udāhṛtam ||13-6||

अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवम् ।
आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः ॥१३-७॥

amānitvam adambhitvam ahiṃsā kṣāntir ārjavam |
ācāryopāsanaṃ śaucaṃ sthairyam ātmavinigrahaḥ ||13-7||

इन्द्रियार्थेषु वैराग्यमनहंकार एव च ।
जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् ॥१३-८॥

indriyārtheṣu vairāgyam anahaṃkāra eva ca |
janmamṛtyujarāvyādhiduḥkhadoṣānudarśanam ||13-8||

असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु ।
नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु ॥१३-९॥

asaktir anabhiṣvaṅgaḥ putradāragṛhādiṣu |
nityaṃ ca samacittatvam iṣṭāniṣṭopapattiṣu ||13-9||

मयि चानन्ययोगेन भक्तिरव्यभिचारिणी ।
विविक्तदेशसेवित्वमरतिर्जनसंसदि ॥१३-१०॥

mayi cānanyayogena bhaktir avyabhicāriṇī ।
viviktadeśasevitvam aratir janasaṃsadi ॥13-10॥

अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम् ।
एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतो ऽन्यथा ॥१३-११॥

adhyātmajñānanityatvaṃ tattvajñānārthadarśanam ।
etaj jñānam iti proktam ajñānaṃ yad ato 'nyathā ॥13-11॥

ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वामृतमश्नुते ।
अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते ॥१३-१२॥

jñeyaṃ yat tat pravakṣyāmi yaj jñātvāmṛtam aśnute ।
anādimat paraṃ brahma na sat tan nāsad ucyate ॥13-12॥

सर्वतःपाणिपादं तत्सर्वतोक्षिशिरोमुखम् ।
सर्वतःश्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥१३-१३॥

sarvataḥpāṇipādaṃ tat sarvatokṣiśiromukham ।
sarvataḥśrutimal loke sarvam āvṛtya tiṣṭhati ॥13-13॥

सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम् ।
असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च ॥१३-१४॥

sarvendriyaguṇābhāsaṃ sarvendriyavivarjitam ।
asaktaṃ sarvabhṛc caiva nirguṇaṃ guṇabhoktṛ ca ॥13-14॥

बहिरन्तश्च भूतानामचरं चरमेव च ।
सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चान्तिके च तत् ॥१३-१५॥

bahir antaś ca bhūtānām acaraṃ caram eva ca ।
sūkṣmatvāt tad avijñeyaṃ dūrasthaṃ cāntike ca tat ॥13-15॥

अविभक्तं च भूतेषु विभक्तमिव च स्थितम् ।
भूतभर्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च ॥१३-१६॥

avibhaktaṃ ca bhūteṣu vibhaktam iva ca sthitam ।
bhūtabhartṛ ca taj jñeyaṃ grasiṣṇu prabhaviṣṇu ca ॥13-16॥



ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते ।
ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य विष्ठितम् ॥१३-१७॥

jyotiṣām api taj jyotis tamasaḥ param ucyate ।
jñānaṃ jñeyaṃ jñānagamyaṃ hṛdi sarvasya viṣṭhitam ॥13-17॥

इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः ।
मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते ॥१३-१८॥

iti kṣetraṃ tathā jñānaṃ jñeyaṃ coktaṃ samāsataḥ ।
madbhakta etad vijñāya madbhāvāyopapadyate ॥13-18॥

प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि ।
विकारांश्च गुणांश्चैव विद्धि प्रकृतिसंभवान् ॥१३-१९॥

prakṛtiṃ puruṣaṃ caiva viddhy anādī ubhāv api ।
vikārāṃś ca guṇāṃś caiva viddhi prakṛtisaṃbhavān ॥13-19॥

कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते ।
पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते ॥१३-२०॥

kāryakāraṇakartṛtve hetuḥ prakṛtir ucyate ।
puruṣaḥ sukhaduḥkhānāṃ bhoktṛtve hetur ucyate ॥13-20॥

पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान्गुणान् ।
कारणं गुणसङ्गो ऽस्य सदसद्योनिजन्मसु ॥१३-२१॥

puruṣaḥ prakṛtistho hi bhuṅkte prakṛtijān guṇān ।
kāraṇaṃ guṇasaṅgo 'sya sadasadyonijanmasu ॥13-21॥

उपद्रष्टानुमन्ता च भर्ता भोक्ता महेश्वरः ।
परमात्मेति चाप्युक्तो देहे ऽस्मिन्पुरुषः परः ॥१३-२२॥

upadraṣṭānumantā ca bhartā bhoktā maheśvaraḥ ।
paramātmeti cāpy ukto dehe 'smin puruṣaḥ paraḥ ॥13-22॥

य एवं वेत्ति पुरुषं प्रकृतिं च गुणैः सह ।
सर्वथा वर्तमानो ऽपि न स भूयो ऽभिजायते ॥१३-२३॥

ya evaṃ vetti puruṣaṃ prakṛtiṃ ca guṇaiḥ saha ।
sarvathā vartamāno 'pi na sa bhūyo 'bhijāyate ॥13-23॥

ध्यानेनात्मनि पश्यन्ति के चिदात्मानमात्मना ।
अन्ये सांख्येन योगेन कर्मयोगेन चापरे ॥१३-२४॥

dhyānenātmani paśyanti ke cid ātmānam ātmanā |
anye sāṃkhyena yogena karmayogena cāpare ||13-24||

अन्ये त्वेवमजानन्तः श्रुत्वान्येभ्य उपासते ।
ते ऽपि चातितरन्त्येव मृत्युं श्रुतिपरायणाः ॥१३-२५॥

anye tv evam ajānantaḥ śrutvānyebhya upāsate |
te 'pi cātitaranty eva mṛtyuṃ śrutiparāyaṇāḥ ||13-25||

यावत्संजायते किं चित्सत्त्वं स्थावरजङ्गमम् ।
क्षेत्रक्षेत्रज्ञसंयोगात्तद्विद्धि भरतर्षभ ॥१३-२६॥

yāvat saṃjāyate kiṃ cit sattvaṃ sthāvarajaṅgamam |
kṣetrakṣetrajñasaṃyogāt tad viddhi bharatarṣabha ||13-26||

समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम् ।
विनश्यत्स्वविनश्यन्तं यः पश्यति स पश्यति ॥१३-२७॥

samaṃ sarveṣu bhūteṣu tiṣṭhantaṃ parameśvaram |
vinaśyatsv avinaśyantaṃ yaḥ paśyati sa paśyati ||13-27||

समं पश्यन्हि सर्वत्र समवस्थितमीश्वरम् ।
न हिनस्त्यात्मनात्मानं ततो याति परां गतिम् ॥१३-२८॥

samaṃ paśyan hi sarvatra samavasthitam īśvaram |
na hinasty ātmanātmānaṃ tato yāti parāṃ gatim ||13-28||

प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः ।
यः पश्यति तथात्मानमकर्तारं स पश्यति ॥१३-२९॥

prakṛtyaiva ca karmāṇi kriyamāṇāni sarvaśaḥ |
yaḥ paśyati tathātmānam akartāraṃ sa paśyati ||13-29||

यदा भूतपृथग्भावमेकस्थमनुपश्यति ।
तत एव च विस्तारं ब्रह्म संपद्यते तदा ॥१३-३०॥

yadā bhūtapṛthagbhāvam ekastham anupaśyati |
tata eva ca vistāraṃ brahma saṃpadyate tadā ||13-30||



अनादित्वान्निर्गुणत्वात्परमात्मायमव्ययः ।
शरीरस्थो ऽपि कौन्तेय न करोति न लिप्यते ॥१३-३१॥

anāditvān nirguṇatvāt paramātmāyam avyayaḥ |
śarīrastho 'pi kaunteya na karoti na lipyate ||13-31||

यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते ।
सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते ॥१३-३२॥

yathā sarvagataṃ saukṣmyād ākāśaṃ nopalipyate |
sarvatrāvasthito dehe tathātmā nopalipyate ||13-32||

यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः ।
क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत ॥१३-३३॥

yathā prakāśayaty ekaḥ kṛtsnaṃ lokam imaṃ raviḥ |
kṣetraṃ kṣetrī tathā kṛtsnaṃ prakāśayati bhārata ||13-33||

क्षेत्रक्षेत्रज्ञयोरेवमन्तरं ज्ञानचक्षुषा ।
भूतप्रकृतिमोक्षं च ये विदुर्यान्ति ते परम् ॥१३-३४॥

kṣetrakṣetrajñayor evam antaraṃ jñānacakṣuṣā |
bhūtaprakṛtimokṣaṃ ca ye vidur yānti te param ||13-34||

श्रीभगवानुवाच ।
परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमम् ।
यज्ज्ञात्वा मुनयः सर्वे परां सिद्धिमितो गताः ॥१४-१॥

śrībhagavān uvāca |
paraṃ bhūyaḥ pravakṣyāmi jñānānāṃ jñānam uttamam |
yaj jñātvā munayaḥ sarve parāṃ siddhim ito gatāḥ ||14-1||

इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ।
सर्गे ऽपि नोपजायन्ते प्रलये न व्यथन्ति च ॥१४-२॥

idaṃ jñānam upāśritya mama sādharmyam āgatāḥ |
sarge 'pi nopajāyante pralaye na vyathanti ca ||14-2||

मम योनिर्महद्ब्रह्म तस्मिन्गर्भं दधाम्यहम् ।
संभवः सर्वभूतानां ततो भवति भारत ॥१४-३॥

mama yonir mahad brahma tasmin garbhaṃ dadhāmy aham |
saṃbhavaḥ sarvabhūtānāṃ tato bhavati bhārata ||14-3||

सर्वयोनिषु कौन्तेय मूर्तयः संभवन्ति याः ।
तासां ब्रह्म महद्योनिरहं बीजप्रदः पिता ॥ १४-४॥

sarvayoniṣu kaunteya mūrtayaḥ saṃbhavanti yāḥ ǀ
tāsāṃ brahma mahad yonir ahaṃ bījapradaḥ pitā ǁ14-4ǁ

सत्त्वं रजस्तम इति गुणाः प्रकृतिसंभवाः ।
निबध्नन्ति महाबाहो देहे देहिनमव्ययम् ॥ १४-५॥

sattvaṃ rajas tama iti guṇāḥ prakṛtisaṃbhavāḥ ǀ
nibadhnanti mahābāho dehe dehinam avyayam ǁ14-5ǁ

तत्र सत्त्वं निर्मलत्वात्प्रकाशकमनामयम् ।
सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ ॥ १४-६ ॥

tatra sattvaṃ nirmalatvāt prakāśakam anāmayam ǀ
sukhasaṅgena badhnāti jñānasaṅgena cānagha ǁ14-6ǁ

रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम् ।
तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम् ॥ १४-७॥

rajo rāgātmakaṃ viddhi tṛṣṇāsaṅgasamudbhavam ǀ
tan nibadhnāti kaunteya karmasaṅgena dehinam ǁ14-7ǁ

तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम् ।
प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत ॥ १४-८॥

tamas tv ajñānajaṃ viddhi mohanaṃ sarvadehinām ǀ
pramādālasyanidrābhis tan nibadhnāti bhārata ǁ14-8ǁ

सत्त्वं सुखे सञ्जयति रजः कर्मणि भारत ।
ज्ञानमावृत्य तु तमः प्रमादे सञ्जयत्युत ॥ १४-९॥

sattvaṃ sukhe sañjayati rajaḥ karmaṇi bhārata ǀ
jñānam āvṛtya tu tamaḥ pramāde sañjayaty uta ǁ14-9ǁ

रजस्तमश्चाभिभूय सत्त्वं भवति भारत ।
रजः सत्त्वं तमश्चैव तमः सत्त्वं रजस्तथा ॥ १४-१०॥

rajas tamaś cābhibhūya sattvaṃ bhavati bhārata ǀ
rajaḥ sattvaṃ tamaś caiva tamaḥ sattvaṃ rajas tathā ǁ14-10ǁ



सर्वद्वारेषु देहे ऽस्मिन्प्रकाश उपजायते ।
ज्ञानं यदा तदा विद्याद्विवृद्धं सत्त्वमित्युत ॥ १४-११॥

sarvadvāreṣu dehe 'smin prakāśa upajāyate ǀ
jñānaṃ yadā tadā vidyād vivṛddhaṃ sattvam ity uta ǁ14-11ǁ

लोभः प्रवृत्तिरारम्भः कर्मणामशमः स्पृहा ।
रजस्येतानि जायन्ते विवृद्धे भरतर्षभ ॥ १४-१२॥

lobhaḥ pravṛttir ārambhaḥ karmaṇām aśamaḥ spṛhā ǀ
rajasy etāni jāyante vivṛddhe bharatarṣabha ǁ14-12ǁ

अप्रकाशो ऽप्रवृत्तिश्च प्रमादो मोह एव च ।
तमस्येतानि जायन्ते विवृद्धे कुरुनन्दन ॥ १४-१३॥

aprakāśo 'pravṛttiś ca pramādo moha eva ca ǀ
tamasy etāni jāyante vivṛddhe kurunandana ǁ14-13ǁ

यदा सत्त्वे प्रवृद्धे तु प्रलयं याति देहभृत् ।
तदोत्तमविदां लोकानमलान्प्रतिपद्यते ॥ १४-१४॥

yadā sattve pravṛddhe tu pralayaṃ yāti dehabhṛt ǀ
tadottamavidāṃ lokān amalān pratipadyate ǁ14-14ǁ

रजसि प्रलयं गत्वा कर्मसङ्गिषु जायते ।
तथा प्रलीनस्तमसि मूढयोनिषु जायते ॥ १४-१५॥

rajasi pralayaṃ gatvā karmasaṅgiṣu jāyate ǀ
tathā pralīnas tamasi mūḍhayoniṣu jāyate ǁ14-15ǁ

कर्मणः सुकृतस्याहुः सात्त्विकं निर्मलं फलम् ।
रजसस्तु फलं दुःखमज्ञानं तमसः फलम् ॥ १४-१६॥

karmaṇaḥ sukṛtasyāhuḥ sāttvikaṃ nirmalaṃ phalam ǀ
rajasas tu phalaṃ duḥkham ajñānaṃ tamasaḥ phalam ǁ14-16ǁ

सत्त्वात्संजायते ज्ञानं रजसो लोभ एव च ।
प्रमादमोहौ तमसो भवतो ऽज्ञानमेव च ॥ १४-१७॥

sattvāt saṃjāyate jñānaṃ rajaso lobha eva ca ǀ
pramādamohau tamaso bhavato 'jñānam eva ca ǁ14-17ǁ

ऊर्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः ।
जघन्यगुणवृत्तस्था अधो गच्छन्ति तामसाः ॥१४-१८॥

ūrdhvaṃ gacchanti sattvasthā madhye tiṣṭhanti rājasāḥ |
jaghanyaguṇavṛttasthā adho gacchanti tāmasāḥ ||14-18||

नान्यं गुणेभ्यः कर्तारं यदा द्रष्टानुपश्यति ।
गुणेभ्यश्च परं वेत्ति मद्भावं सो ऽधिगच्छति ॥१४-१९॥

nānyaṃ guṇebhyaḥ kartāraṃ yadā draṣṭānupaśyati |
guṇebhyaś ca paraṃ vetti madbhāvaṃ so 'dhigacchati ||14-19||

गुणानेतानतीत्य त्रीन्देही देहसमुद्भवान् ।
जन्ममृत्युजरादुःखैर्विमुक्तो ऽमृतमश्नुते ॥१४-२०॥

guṇān etān atītya trīn dehī dehasamudbhavān |
janmamṛtyujarāduḥkhair vimukto 'mṛtam aśnute ||14-20||

अर्जुन उवाच ।
कैर्लिङ्गैस्त्रीन्गुणानेतानतीतो भवति प्रभो ।
किमाचारः कथं चैतांस्त्रीन्गुणानतिवर्तते ॥१४-२१॥

arjuna uvāca |
kair liṅgais trīn guṇān etān atīto bhavati prabho |
kimācāraḥ kathaṃ caitāṃs trīn guṇān ativartate ||14-21||

श्रीभगवानुवाच ।
प्रकाशं च प्रवृत्तिं च मोहमेव च पाण्डव ।
न द्वेष्टि संप्रवृत्तानि न निवृत्तानि काङ्क्षति ॥१४-२२॥

śrībhagavān uvāca |
prakāśaṃ ca pravṛttiṃ ca moham eva ca pāṇḍava |
na dveṣṭi saṃpravṛttāni na nivṛttāni kāṅkṣati ||14-22||

उदासीनवदासीनो गुणैर्यो न विचाल्यते ।
गुणा वर्तन्त इत्येव यो ऽवतिष्ठति नेङ्गते ॥१४-२३॥

udāsīnavad āsīno guṇair yo na vicālyate |
guṇā vartanta ity eva yo 'vatiṣṭhati neṅgate ||14-23||



समदुःखसुखः स्वस्थः समलोष्टाश्मकाञ्चनः ।
तुल्यप्रियाप्रियो धीरस्तुल्यनिन्दात्मसंस्तुतिः ॥१४-२४॥

samaduḥkhasukhaḥ svasthaḥ samaloṣṭāśmakāñcanaḥ |
tulyapriyāpriyo dhīras tulyanindātmasaṃstutiḥ ||14-24||

मानावमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः ।
सर्वारम्भपरित्यागी गुणातीतः स उच्यते ॥१४-२५॥

mānāvamānayos tulyas tulyo mitrāripakṣayoḥ |
sarvārambhaparityāgī guṇātītaḥ sa ucyate ||14-25||

मां च यो ऽव्यभिचारेण भक्तियोगेन सेवते ।
स गुणान्समतीत्यैतान्ब्रह्मभूयाय कल्पते ॥१४-२६॥

māṃ ca yo 'vyabhicāreṇa bhaktiyogena sevate |
sa guṇān samatītyaitān brahmabhūyāya kalpate ||14-26||

ब्रह्मणो हि प्रतिष्ठाहममृतस्याव्ययस्य च ।
शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य च ॥१४-२७॥

brahmaṇo hi pratiṣṭhāham amṛtasyāvyayasya ca |
śāśvatasya ca dharmasya sukhasyaikāntikasya ca ||14-27||

श्रीभगवानुवाच ।
ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम् ।
छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित् ॥१५-१॥

śrībhagavān uvāca |
ūrdhvamūlam adhaḥśākham aśvatthaṃ prāhur avyayam |
chandāṃsi yasya parṇāni yas taṃ veda sa vedavit ||15-1||

अधश्चोर्ध्वं प्रसृतास्तस्य शाखा
गुणप्रवृद्धा विषयप्रवालाः ।
अधश्च मूलान्यनुसंततानि
कर्मानुबन्धीनि मनुष्यलोके ॥१५-२॥

adhaś cordhvaṃ prasṛtās tasya śākhā; guṇapravṛddhā viṣayapravālāḥ |
adhaś ca mūlāny anusaṃtatāni; karmānubandhīni manuṣyaloke ||15-2||

न रूपमस्येह तथोपलभ्यते
नान्तो न चादिर्न च संप्रतिष्ठा ।
अश्वत्थमेनं सुविरूढमूलम्
असङ्गशस्त्रेण दृढेन छित्त्वा ॥ १५-३ ॥

na rūpam asyeha tathopalabhyate; nānto na cādir na ca saṃpratiṣṭhā |
aśvattham enaṃ suvirūḍhamūlam; asaṅgaśastreṇa dṛḍhena chittvā ||15-3||

ततः पदं तत्परिमार्गितव्यं
यस्मिन्गता न निवर्तन्ति भूयः ।
तमेव चाद्यं पुरुषं प्रपद्ये
यतः प्रवृत्तिः प्रसृता पुराणी ॥ १५-४ ॥

tataḥ padaṃ tatparimārgitavyaṃ; yasmin gatā na nivartanti bhūyaḥ |
tam eva cādyaṃ puruṣaṃ prapadye; yataḥ pravṛttiḥ prasṛtā purāṇī ||15-4||

निर्मानमोहा जितसङ्गदोषा
अध्यात्मनित्या विनिवृत्तकामाः ।
द्वंद्वैर्विमुक्ताः सुखदुःखसंज्ञैर्
गच्छन्त्यमूढाः पदमव्ययं तत् ॥ १५-५ ॥

nirmānamohā jitasaṅgadoṣā; adhyātmanityā vinivṛttakāmāḥ |
dvaṃdvair vimuktāḥ sukhaduḥkhasaṃjñair; gacchanty amūḍhāḥ padam avyayaṃ tat ||15-5||

न तद्भासयते सूर्यो न शशाङ्को न पावकः ।
यद्गत्वा न निवर्तन्ते तद्धाम परमं मम ॥ १५-६ ॥

na tad bhāsayate sūryo na śaśāṅko na pāvakaḥ |
yad gatvā na nivartante tad dhāma paramaṃ mama ||15-6||

ममैवांशो जीवलोके जीवभूतः सनातनः ।
मनःषष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति ॥ १५-७ ॥

mamaivāṃśo jīvaloke jīvabhūtaḥ sanātanaḥ |
manaḥṣaṣṭhānīndriyāṇi prakṛtisthāni karṣati ||15-7||



शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः ।
गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात् ॥ १५-८ ॥

śarīraṃ yad avāpnoti yac cāpy utkrāmatīśvaraḥ |
gṛhītvaitāni saṃyāti vāyur gandhān ivāśayāt ||15-8||

श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च ।
अधिष्ठाय मनश्चायं विषयानुपसेवते ॥ १५-९ ॥

śrotraṃ cakṣuḥ sparśanaṃ ca rasanaṃ ghrāṇam eva ca |
adhiṣṭhāya manaś cāyaṃ viṣayān upasevate ||15-9||

उत्क्रामन्तं स्थितं वापि भुञ्जानं वा गुणान्वितम् ।
विमूढा नानुपश्यन्ति पश्यन्ति ज्ञानचक्षुषः ॥ १५-१० ॥

utkrāmantaṃ sthitaṃ vāpi bhuñjānaṃ vā guṇānvitam |
vimūḍhā nānupaśyanti paśyanti jñānacakṣuṣaḥ ||15-10||

यतन्तो योगिनश्चैनं पश्यन्त्यात्मन्यवस्थितम् ।
यतन्तो ऽप्यकृतात्मानो नैनं पश्यन्त्यचेतसः ॥ १५-११ ॥

yatanto yoginaś cainaṃ paśyanty ātmany avasthitam |
yatanto 'py akṛtātmāno nainaṃ paśyanty acetasaḥ ||15-11||

यदादित्यगतं तेजो जगद्भासयते ऽखिलम् ।
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम् ॥ १५-१२ ॥

yad ādityagataṃ tejo jagad bhāsayate 'khilam |
yac candramasi yac cāgnau tat tejo viddhi māmakam ||15-12||

गामाविश्य च भूतानि धारयाम्यहमोजसा ।
पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः ॥ १५-१३ ॥

gām āviśya ca bhūtāni dhārayāmy aham ojasā |
puṣṇāmi cauṣadhīḥ sarvāḥ somo bhūtvā rasātmakaḥ ||15-13||

अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः ।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ॥ १५-१४ ॥

ahaṃ vaiśvānaro bhūtvā prāṇinām deham āśritaḥ |
prāṇāpānasamāyuktaḥ pacāmy annaṃ caturvidham ||15-14||

सर्वस्य चाहं हृदि संनिविष्टो
मत्तः स्मृतिर्ज्ञानमपोहनं च ।
वेदैश्च सर्वैरहमेव वेद्यो
वेदान्तकृद्वेदविदेव चाहम् ॥ १५-१५ ॥

sarvasya cāhaṃ hṛdi saṃniviṣṭo; mattaḥ smṛtir jñānam apohanaṃ ca |
vedaiś ca sarvair aham eva vedyo; vedāntakṛd vedavid eva cāham ||15-15||

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
क्षरः सर्वाणि भूतानि कूटस्थो ऽक्षर उच्यते ॥ १५-१६ ॥

dvāv imau puruṣau loke kṣaraś cākṣara eva ca |
kṣaraḥ sarvāṇi bhūtāni kūṭastho 'kṣara ucyate ||15-16||

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥ १५-१७ ॥

uttamaḥ puruṣas tv anyaḥ paramātmety udāhṛtaḥ |
yo lokatrayam āviśya bibharty avyaya īśvaraḥ ||15-17||

यस्मात्क्षरमतीतो ऽहमक्षरादपि चोत्तमः ।
अतो ऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥ १५-१८ ॥

yasmāt kṣaram atīto 'ham akṣarād api cottamaḥ |
ato 'smi loke vede ca prathitaḥ puruṣottamaḥ ||15-18||

यो मामेवमसंमूढो जानाति पुरुषोत्तमम् ।
स सर्वविद्भजति मां सर्वभावेन भारत ॥ १५-१९ ॥

yo mām evam asaṃmūḍho jānāti puruṣottamam |
sa sarvavid bhajati māṃ sarvabhāvena bhārata ||15-19||

इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ ।
एतद्बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारत ॥ १५-२० ॥

iti guhyatamaṃ śāstram idam uktaṃ mayānagha |
etad buddhvā buddhimān syāt kṛtakṛtyaś ca bhārata ||15-20||



श्रीभगवानुवाच ।
अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः ।
दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ॥ १६-१ ॥

śrībhagavān uvāca |
abhayaṃ sattvasaṃśuddhir jñānayogavyavasthitiḥ |
dānaṃ damaś ca yajñaś ca svādhyāyas tapa ārjavam ||16-1||

अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम् ।
दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम् ॥ १६-२ ॥

ahiṃsā satyam akrodhas tyāgaḥ śāntir apaiśunam |
dayā bhūteṣv aloluptvaṃ mārdavaṃ hrīr acāpalam ||16-2||

तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता ।
भवन्ति संपदं दैवीमभिजातस्य भारत ॥ १६-३ ॥

tejaḥ kṣamā dhṛtiḥ śaucam adroho nātimānitā |
bhavanti saṃpadaṃ daivīm abhijātasya bhārata ||16-3||

दम्भो दर्पो ऽतिमानश्च क्रोधः पारुष्यमेव च ।
अज्ञानं चाभिजातस्य पार्थ संपदमासुरीम् ॥ १६-४ ॥

dambho darpo 'timānaś ca krodhaḥ pāruṣyam eva ca |
ajñānaṃ cābhijātasya pārtha saṃpadam āsurīm ||16-4||

दैवी संपद्विमोक्षाय निबन्धायासुरी मता ।
मा शुचः संपदं दैवीमभिजातो ऽसि पाण्डव ॥ १६-५ ॥

daivī saṃpad vimokṣāya nibandhāyāsurī matā |
mā śucaḥ saṃpadaṃ daivīm abhijāto 'si pāṇḍava ||16-5||

द्वौ भूतसर्गौ लोके ऽस्मिन्दैव आसुर एव च ।
दैवो विस्तरशः प्रोक्त आसुरं पार्थ मे शृणु ॥ १६-६ ॥

dvau bhūtasargau loke 'smin daiva āsura eva ca |
daivo vistaraśaḥ prokta āsuraṃ pārtha me śṛṇu ||16-6||

प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः ।
न शौचं नापि चाचारो न सत्यं तेषु विद्यते ॥ १६-७ ॥

pravṛttiṃ ca nivṛttiṃ ca janā na vidur āsurāḥ |
na śaucaṃ nāpi cācāro na satyaṃ teṣu vidyate ||16-7||

असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् ।
अपरस्परसंभूतं किमन्यत्कामहैतुकम् ॥ १६-८॥
asatyam apratiṣṭhaṃ te jagad āhur anīśvaram |
aparasparasaṃbhūtaṃ kim anyat kāmahaitukam ||16-8||

एतां दृष्टिमवष्टभ्य नष्टात्मानो ऽल्पबुद्धयः ।
प्रभवन्त्युग्रकर्माणः क्षयाय जगतो ऽहिताः ॥ १६-९॥
etāṃ dṛṣṭim avaṣṭabhya naṣṭātmāno 'lpabuddhayaḥ |
prabhavanty ugrakarmāṇaḥ kṣayāya jagato 'hitāḥ ||16-9||

काममाश्रित्य दुष्पूरं दम्भमानमदान्विताः ।
मोहाद्गृहीत्वासद्ग्राहान्प्रवर्तन्ते ऽशुचिव्रताः ॥ १६-१०॥
kāmam āśritya duṣpūraṃ dambhamānamadānvitāḥ |
mohād gṛhītvāsadgrāhān pravartante 'śucivratāḥ ||16-10||

चिन्तामपरिमेयां च प्रलयान्तामुपाश्रिताः ।
कामोपभोगपरमा एतावदिति निश्चिताः ॥ १६-११॥
cintām aparimeyāṃ ca pralayāntām upāśritāḥ |
kāmopabhogaparamā etāvad iti niścitāḥ ||16-11||

आशापाशशतैर्बद्धाः कामक्रोधपरायणाः ।
ईहन्ते कामभोगार्थमन्यायेनार्थसंचयान् ॥ १६-१२॥
āśāpāśaśatair baddhāḥ kāmakrodhaparāyaṇāḥ |
īhante kāmabhogārtham anyāyenārthasaṃcayān ||16-12||

इदमद्य मया लब्धमिदं प्राप्स्ये मनोरथम् ।
इदमस्तीदमपि मे भविष्यति पुनर्धनम् ॥ १६-१३॥
idam adya mayā labdham idaṃ prāpsye manoratham |
idam astīdam api me bhaviṣyati punar dhanam ||16-13||

असौ मया हतः शत्रुर्हनिष्ये चापरानपि ।
ईश्वरो ऽहमहं भोगी सिद्धो ऽहं बलवान्सुखी ॥ १६-१४॥
asau mayā hataḥ śatrur haniṣye cāparān api |
īśvaro 'ham ahaṃ bhogī siddho 'haṃ balavān sukhī ||16-14||



आढ्यो ऽभिजनवानस्मि को ऽन्यो ऽस्ति सदृशो मया ।
यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः ॥ १६-१५॥
āḍhyo 'bhijanavān asmi ko 'nyo 'sti sadṛśo mayā |
yakṣye dāsyāmi modiṣya ity ajñānavimohitāḥ ||16-15||

अनेकचित्तविभ्रान्ता मोहजालसमावृताः ।
प्रसक्ताः कामभोगेषु पतन्ति नरके ऽशुचौ ॥ १६-१६॥
anekacittavibhrāntā mohajālasamāvṛtāḥ |
prasaktāḥ kāmabhogeṣu patanti narake 'śucau ||16-16||

आत्मसंभाविताः स्तब्धा धनमानमदान्विताः ।
यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्वकम् ॥ १६-१७॥
ātmasaṃbhāvitāḥ stabdhā dhanamānamadānvitāḥ |
yajante nāmayajñais te dambhenāvidhipūrvakam ||16-17||

अहंकारं बलं दर्पं कामं क्रोधं च संश्रिताः ।
मामात्मपरदेहेषु प्रद्विषन्तो ऽभ्यसूयकाः ॥ १६-१८॥
ahaṃkāraṃ balaṃ darpaṃ kāmaṃ krodhaṃ ca saṃśritāḥ |
mām ātmaparadeheṣu pradviṣanto 'bhyasūyakāḥ ||16-18||

तानहं द्विषतः क्रूरान्संसारेषु नराधमान् ।
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ॥ १६-१९॥
tān ahaṃ dviṣataḥ krūrān saṃsāreṣu narādhamān |
kṣipāmy ajasram aśubhān āsurīṣv eva yoniṣu ||16-19||

आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि ।
मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम् ॥ १६-२०॥
āsurīṃ yonim āpannā mūḍhā janmani janmani |
mām aprāpyaiva kaunteya tato yānty adhamāṃ gatim ||16-20||

त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः ।
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ॥ १६-२१॥
trividhaṃ narakasyedaṃ dvāraṃ nāśanam ātmanaḥ |
kāmaḥ krodhas tathā lobhas tasmād etat trayaṃ tyajet ||16-21||

एतैर्विमुक्तः कौन्तेय तमोद्वारैस्त्रिभिर्नरः ।
आचरत्यात्मनः श्रेयस्ततो याति परां गतिम् ॥१६-२२॥
etair vimuktaḥ kaunteya tamodvārais tribhir naraḥ |
ācaraty ātmanaḥ śreyas tato yāti parāṃ gatim ||16-22||

यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः ।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम् ॥१६-२३॥
yaḥ śāstravidhim utsṛjya vartate kāmakārataḥ |
na sa siddhim avāpnoti na sukhaṃ na parāṃ gatim ||16-23||

तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ ।
ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि ॥१६-२४॥
tasmāc chāstraṃ pramāṇaṃ te kāryākāryavyavasthitau |
jñātvā śāstravidhānoktaṃ karma kartum ihārhasi ||16-24||

अर्जुन उवाच ।
ये शास्त्रविधिमुत्सृज्य यजन्ते श्रद्धयान्विताः ।
तेषां निष्ठा तु का कृष्ण सत्त्वमाहो रजस्तमः ॥१७-१॥
arjuna uvāca |
ye śāstravidhim utsṛjya yajante śraddhayānvitāḥ |
teṣāṃ niṣṭhā tu kā kṛṣṇa sattvam āho rajas tamaḥ ||17-1||

श्रीभगवानुवाच ।
त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा ।
सात्त्विकी राजसी चैव तामसी चेति तां शृणु ॥१७-२॥
śrībhagavān uvāca |
trividhā bhavati śraddhā dehināṃ sā svabhāvajā |
sāttvikī rājasī caiva tāmasī ceti tāṃ śṛṇu ||17-2||

सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत ।
श्रद्धामयो ऽयं पुरुषो यो यच्छ्रद्धः स एव सः ॥१७-३॥
sattvānurūpā sarvasya śraddhā bhavati bhārata |
śraddhāmayo 'yaṃ puruṣo yo yacchraddhaḥ sa eva saḥ ||17-3||



यजन्ते सात्त्विका देवान्यक्षरक्षांसि राजसाः ।
प्रेतान्भूतगणांश्चान्ये यजन्ते तामसा जनाः ॥१७-४॥
yajante sāttvikā devān yakṣarakṣāṃsi rājasāḥ |
pretān bhūtagaṇāṃś cānye yajante tāmasā janāḥ ||17-4||

अशास्त्रविहितं घोरं तप्यन्ते ये तपो जनाः ।
दम्भाहंकारसंयुक्ताः कामरागबलान्विताः ॥१७-५॥
aśāstravihitaṃ ghoraṃ tapyante ye tapo janāḥ |
dambhāhaṃkārasaṃyuktāḥ kāmarāgabalānvitāḥ ||17-5||

कर्शयन्तः शरीरस्थं भूतग्राममचेतसः ।
मां चैवान्तःशरीरस्थं तान्विद्ध्यासुरनिश्चयान् ॥१७-६॥
karśayantaḥ śarīrasthaṃ bhūtagrāmam acetasaḥ |
māṃ caivāntaḥśarīrasthaṃ tān viddhy āsuraniścayān ||17-6||

आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः ।
यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृणु ॥१७-७॥
āhāras tv api sarvasya trividho bhavati priyaḥ |
yajñas tapas tathā dānaṃ teṣāṃ bhedam imaṃ śṛṇu ||17-7||

आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्धनाः ।
रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः ॥१७-८॥
āyuḥsattvabalārogyasukhaprītivivardhanāḥ |
rasyāḥ snigdhāḥ sthirā hṛdyā āhārāḥ sāttvikapriyāḥ ||17-8||

कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः ।
आहारा राजसस्येष्टा दुःखशोकामयप्रदाः ॥१७-९॥
kaṭvamlalavaṇātyuṣṇatīkṣṇarūkṣavidāhinaḥ |
āhārā rājasasyeṣṭā duḥkhaśokāmayapradāḥ ||17-9||

यातयामं गतरसं पूति पर्युषितं च यत् ।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम् ॥१७-१०॥
yātayāmaṃ gatarasaṃ pūti paryuṣitaṃ ca yat |
ucchiṣṭam api cāmedhyaṃ bhojanaṃ tāmasapriyam ||17-10||

अफलाकाङ्क्षिभिर्यज्ञो विधिदृष्टो य इज्यते ।
यष्टव्यमेवेति मनः समाधाय स सात्त्विकः ॥१७-११॥

aphalākāṅkṣibhir yajño vidhidṛṣṭo ya ijyate |
yaṣṭavyam eveti manaḥ samādhāya sa sāttvikaḥ ||17-11||

अभिसंधाय तु फलं दम्भार्थमपि चैव यत् ।
इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम् ॥१७-१२॥

abhisaṃdhāya tu phalaṃ dambhārtham api caiva yat |
ijyate bharataśreṣṭha taṃ yajñaṃ viddhi rājasam ||17-12||

विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम् ।
श्रद्धाविरहितं यज्ञं तामसं परिचक्षते ॥१७-१३॥

vidhihīnam asṛṣṭānnaṃ mantrahīnam adakṣiṇam |
śraddhāvirahitaṃ yajñaṃ tāmasaṃ paricakṣate ||17-13||

देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम् ।
ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते ॥१७-१४॥

devadvijaguruprājñapūjanaṃ śaucam ārjavam |
brahmacaryam ahiṃsā ca śārīraṃ tapa ucyate ||17-14||

अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत् ।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ॥१७-१५॥

anudvegakaraṃ vākyaṃ satyaṃ priyahitaṃ ca yat |
svādhyāyābhyasanaṃ caiva vāṅmayaṃ tapa ucyate ||17-15||

मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः ।
भावसंशुद्धिरित्येतत्तपो मानसमुच्यते ॥१७-१६॥

manaḥprasādaḥ saumyatvaṃ maunam ātmavinigrahaḥ |
bhāvasaṃśuddhir ity etat tapo mānasam ucyate ||17-16||

श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरैः ।
अफलाकाङ्क्षिभिर्युक्तैः सात्त्विकं परिचक्षते ॥१७-१७॥

śraddhayā parayā taptaṃ tapas tat trividhaṃ naraiḥ |
aphalākāṅkṣibhir yuktaiḥ sāttvikaṃ paricakṣate ||17-17||



सत्कारमानपूजार्थं तपो दम्भेन चैव यत् ।
क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम् ॥१७-१८॥

satkāramānapūjārthaṃ tapo dambhena caiva yat |
kriyate tad iha proktaṃ rājasaṃ calam adhruvam ||17-18||

मूढग्राहेणात्मनो यत्पीडया क्रियते तपः ।
परस्योत्सादनार्थं वा तत्तामसमुदाहृतम् ॥१७-१९॥

mūḍhagrāheṇātmano yat pīḍayā kriyate tapaḥ |
parasyotsādanārthaṃ vā tat tāmasam udāhṛtam ||17-19||

दातव्यमिति यद्दानं दीयतेऽनुपकारिणे ।
देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम् ॥१७-२०॥

dātavyam iti yad dānaṃ dīyate 'nupakāriṇe |
deśe kāle ca pātre ca tad dānaṃ sāttvikaṃ smṛtam ||17-20||

यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः ।
दीयते च परिक्लिष्टं तद्दानं राजसं स्मृतम् ॥१७-२१॥

yat tu pratyupakārārthaṃ phalam uddiśya vā punaḥ |
dīyate ca parikliṣṭaṃ tad dānaṃ rājasaṃ smṛtam ||17-21||

अदेशकाले यद्दानमपात्रेभ्यश्च दीयते ।
असत्कृतमवज्ञातं तत्तामसमुदाहृतम् ॥१७-२२॥

adeśakāle yad dānam apātrebhyaś ca dīyate |
asatkṛtam avajñātaṃ tat tāmasam udāhṛtam ||17-22||

ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः ।
ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा ॥१७-२३॥

oṃ tat sad iti nirdeśo brahmaṇas trividhaḥ smṛtaḥ |
brāhmaṇās tena vedāś ca yajñāś ca vihitāḥ purā ||17-23||

तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः ।
प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम् ॥१७-२४॥

tasmād om ity udāhṛtya yajñadānatapaḥkriyāḥ |
pravartante vidhānoktāḥ satataṃ brahmavādinām ||17-24||

तदित्यनभिसंधाय फलं यज्ञतपःक्रियाः ।
दानक्रियाश्च विविधाः क्रियन्ते मोक्षकाङ्क्षिभिः ॥१७-२५॥

tad ity anabhisaṃdhāya phalaṃ yajñatapaḥkriyāḥ |
dānakriyāś ca vividhāḥ kriyante mokṣakāṅkṣibhiḥ ||17-25||

सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते ।
प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते ॥१७-२६॥

sadbhāve sādhubhāve ca sad ity etat prayujyate |
praśaste karmaṇi tathā sacchabdaḥ pārtha yujyate ||17-26||

यज्ञे तपसि दाने च स्थितिः सदिति चोच्यते ।
कर्म चैव तदर्थीयं सदित्येवाभिधीयते ॥१७-२७॥

yajñe tapasi dāne ca sthitiḥ sad iti cocyate |
karma caiva tadarthīyaṃ sad ity evābhidhīyate ||17-27||

अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् ।
असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह ॥१७-२८॥

aśraddhayā hutaṃ dattaṃ tapas taptaṃ kṛtaṃ ca yat |
asad ity ucyate pārtha na ca tat pretya no iha ||17-28||

अर्जुन उवाच ।
संन्यासस्य महाबाहो तत्त्वमिच्छामि वेदितुम् ।
त्यागस्य च हृषीकेश पृथक्केशिनिषूदन ॥१८-१॥

arjuna uvāca |
saṃnyāsasya mahābāho tattvam icchāmi veditum |
tyāgasya ca hṛṣīkeśa pṛthak keśiniṣūdana ||18-1||

श्रीभगवानुवाच ।
काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः ।
सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः ॥१८-२॥

śrībhagavān uvāca |
kāmyānāṃ karmaṇāṃ nyāsaṃ saṃnyāsaṃ kavayo viduḥ |
sarvakarmaphalatyāgaṃ prāhus tyāgaṃ vicakṣaṇāḥ ||18-2||



त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः ।
यज्ञदानतपःकर्म न त्याज्यमिति चापरे ॥१८-३॥

tyājyaṃ doṣavad ity eke karma prāhur manīṣiṇaḥ |
yajñadānatapaḥkarma na tyājyam iti cāpare ||18-3||

निश्चयं शृणु मे तत्र त्यागे भरतसत्तम ।
त्यागो हि पुरुषव्याघ्र त्रिविधः संप्रकीर्तितः ॥१८-४॥

niścayaṃ śṛṇu me tatra tyāge bharatasattama |
tyāgo hi puruṣavyāghra trividhaḥ saṃprakīrtitaḥ ||18-4||

यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत् ।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ॥१८-५॥

yajñadānatapaḥkarma na tyājyaṃ kāryam eva tat |
yajño dānaṃ tapaś caiva pāvanāni manīṣiṇām ||18-5||

एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च ।
कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम् ॥१८-६॥

etāny api tu karmāṇi saṅgaṃ tyaktvā phalāni ca |
kartavyānīti me pārtha niścitaṃ matam uttamam ||18-6||

नियतस्य तु संन्यासः कर्मणो नोपपद्यते ।
मोहात्तस्य परित्यागस्तामसः परिकीर्तितः ॥१८-७॥

niyatasya tu saṃnyāsaḥ karmaṇo nopapadyate |
mohāt tasya parityāgas tāmasaḥ parikīrtitaḥ ||18-7||

दुःखमित्येव यत्कर्म कायक्लेशभयात्त्यजेत् ।
स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत् ॥१८-८॥

duḥkham ity eva yat karma kāyakleśabhayāt tyajet |
sa kṛtvā rājasaṃ tyāgaṃ naiva tyāgaphalaṃ labhet ||18-8||

कार्यमित्येव यत्कर्म नियतं क्रियते ऽर्जुन ।
सङ्गं त्यक्त्वा फलं चैव स त्यागः सात्त्विको मतः ॥१८-९॥

kāryam ity eva yat karma niyataṃ kriyate 'rjuna |
saṅgaṃ tyaktvā phalaṃ caiva sa tyāgaḥ sāttviko mataḥ ||18-9||

न द्वेष्ट्यकुशलं कर्म कुशले नानुषज्जते ।
त्यागी सत्त्वसमाविष्टो मेधावी छिन्नसंशयः ॥१८-१०॥

na dveṣṭy akuśalaṃ karma kuśale nānuṣajjate |
tyāgī sattvasamāviṣṭo medhāvī chinnasaṃśayaḥ ||18-10||

न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः ।
यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते ॥१८-११॥

na hi dehabhṛtā śakyaṃ tyaktuṃ karmāṇy aśeṣataḥ |
yas tu karmaphalatyāgī sa tyāgīty abhidhīyate ||18-11||

अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलम् ।
भवत्यत्यागिनां प्रेत्य न तु संन्यासिनां क्व चित् ॥१८-१२॥

aniṣṭam iṣṭaṃ miśraṃ ca trividhaṃ karmaṇaḥ phalam |
bhavaty atyāgināṃ pretya na tu saṃnyāsināṃ kva cit ||18-12||

पञ्चैतानि महाबाहो कारणानि निबोध मे ।
सांख्ये कृतान्ते प्रोक्तानि सिद्धये सर्वकर्मणाम् ॥१८-१३॥

pañcaitāni mahābāho kāraṇāni nibodha me |
sāṃkhye kṛtānte proktāni siddhaye sarvakarmaṇām ||18-13||

अधिष्ठानं तथा कर्ता करणं च पृथग्विधम् ।
विविधाश्च पृथक्चेष्टा दैवं चैवात्र पञ्चमम् ॥१८-१४॥

adhiṣṭhānaṃ tathā kartā karaṇaṃ ca pṛthagvidham |
vividhāś ca pṛthakceṣṭā daivaṃ caivātra pañcamam ||18-14||

शरीरवाङ्मनोभिर्यत्कर्म प्रारभते नरः ।
न्याय्यं वा विपरीतं वा पञ्चैते तस्य हेतवः ॥१८-१५॥

śarīravāṅmanobhir yat karma prārabhate naraḥ |
nyāyyaṃ vā viparītaṃ vā pañcaite tasya hetavaḥ ||18-15||

तत्रैवं सति कर्तारमात्मानं केवलं तु यः ।
पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः ॥१८-१६॥

tatraivaṃ sati kartāram ātmānaṃ kevalaṃ tu yaḥ |
paśyaty akṛtabuddhitvān na sa paśyati durmatiḥ ||18-16||



यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते ।
हत्वापि स इमांल्लोकान्न हन्ति न निबध्यते ॥१८-१७॥

yasya nāhaṃkṛto bhāvo buddhir yasya na lipyate |
hatvāpi sa imāṃl lokān na hanti na nibadhyate ||18-17||

ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना ।
करणं कर्म कर्तेति त्रिविधः कर्मसंग्रहः ॥१८-१८॥

jñānaṃ jñeyaṃ parijñātā trividhā karmacodanā |
karaṇaṃ karma karteti trividhaḥ karmasaṃgrahaḥ ||18-18||

ज्ञानं कर्म च कर्ता च त्रिधैव गुणभेदतः ।
प्रोच्यते गुणसंख्याने यथावच्छृणु तान्यपि ॥१८-१९॥

jñānaṃ karma ca kartā ca tridhaiva guṇabhedataḥ |
procyate guṇasaṃkhyāne yathāvac chṛṇu tāny api ||18-19||

सर्वभूतेषु येनैकं भावमव्ययमीक्षते ।
अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम् ॥१८-२०॥

sarvabhūteṣu yenaikaṃ bhāvam avyayam īkṣate |
avibhaktaṃ vibhakteṣu taj jñānaṃ viddhi sāttvikam ||18-20||

पृथक्त्वेन तु यज्ज्ञानं नानाभावान्पृथग्विधान् ।
वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम् ॥१८-२१॥

pṛthaktvena tu yaj jñānaṃ nānābhāvān pṛthagvidhān |
vetti sarveṣu bhūteṣu taj jñānaṃ viddhi rājasam ||18-21||

यत्तु कृत्स्नवदेकस्मिन्कार्ये सक्तमहैतुकम् ।
अतत्त्वार्थवदल्पं च तत्तामसमुदाहृतम् ॥१८-२२॥

yat tu kṛtsnavad ekasmin kārye saktam ahaitukam |
atattvārthavad alpaṃ ca tat tāmasam udāhṛtam ||18-22||

नियतं सङ्गरहितमरागद्वेषतः कृतम् ।
अफलप्रेप्सुना कर्म यत्तत्सात्त्विकमुच्यते ॥१८-२३॥

niyataṃ saṅgarahitam arāgadveṣataḥ kṛtam |
aphalaprepsunā karma yat tat sāttvikam ucyate ||18-23||

यत्तु कामेप्सुना कर्म साहंकारेण वा पुनः ।
क्रियते बहुलायासं तद्राजसमुदाहृतम् ॥१८-२४॥

yat tu kāmepsunā karma sāhaṃkāreṇa vā punaḥ ।
kriyate bahulāyāsaṃ tad rājasam udāhṛtam ॥18-24॥

अनुबन्धं क्षयं हिंसामनपेक्ष्य च पौरुषम् ।
मोहादारभ्यते कर्म यत्तत्तामसमुच्यते ॥१८-२५॥

anubandhaṃ kṣayaṃ hiṃsām anapekṣya ca pauruṣam ।
mohād ārabhyate karma yat tat tāmasam ucyate ॥18-25॥

मुक्तसङ्गो ऽनहंवादी धृत्युत्साहसमन्वितः ।
सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्त्विक उच्यते ॥१८-२६॥

muktasaṅgo 'nahaṃvādī dhṛtyutsāhasamanvitaḥ ।
siddhyasiddhyor nirvikāraḥ kartā sāttvika ucyate ॥18-26॥

रागी कर्मफलप्रेप्सुर्लुब्धो हिंसात्मको ऽशुचिः ।
हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः ॥१८-२७॥

rāgī karmaphalaprepsur lubdho hiṃsātmako 'śuciḥ ।
harṣaśokānvitaḥ kartā rājasaḥ parikīrtitaḥ ॥18-27॥

अयुक्तः प्राकृतः स्तब्धः शठो नैकृतिको ऽलसः ।
विषादी दीर्घसूत्री च कर्ता तामस उच्यते ॥१८-२८॥

ayuktaḥ prākṛtaḥ stabdhaḥ śaṭho naikṛtiko 'lasaḥ ।
viṣādī dīrghasūtrī ca kartā tāmasa ucyate ॥18-28॥

बुद्धेर्भेदं धृतेश्चैव गुणतस्त्रिविधं शृणु ।
प्रोच्यमानमशेषेण पृथक्त्वेन धनंजय ॥१८-२९॥

buddher bhedaṃ dhṛteś caiva guṇatas trividhaṃ śṛṇu ।
procyamānam aśeṣeṇa pṛthaktvena dhanaṃjaya ॥18-29॥

प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये ।
बन्धं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी ॥१८-३०॥

pravṛttiṃ ca nivṛttiṃ ca kāryākārye bhayābhaye ।
bandhaṃ mokṣaṃ ca yā vetti buddhiḥ sā pārtha sāttvikī ॥18-30॥



यया धर्ममधर्मं च कार्यं चाकार्यमेव च ।
अयथावत्प्रजानाति बुद्धिः सा पार्थ राजसी ॥१८-३१॥

yayā dharmam adharmaṃ ca kāryaṃ cākāryam eva ca ।
ayathāvat prajānāti buddhiḥ sā pārtha rājasī ॥18-31॥

अधर्मं धर्ममिति या मन्यते तमसावृता ।
सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ तामसी ॥१८-३२॥

adharmaṃ dharmam iti yā manyate tamasāvṛtā ।
sarvārthān viparītāṃś ca buddhiḥ sā pārtha tāmasī ॥18-32॥

धृत्या यया धारयते मनःप्राणेन्द्रियक्रियाः ।
योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्त्विकी ॥१८-३३॥

dhṛtyā yayā dhārayate manaḥprāṇendriyakriyāḥ ।
yogenāvyabhicāriṇyā dhṛtiḥ sā pārtha sāttvikī ॥18-33॥

यया तु धर्मकामार्थान्धृत्या धारयते ऽर्जुन ।
प्रसङ्गेन फलाकाङ्क्षी धृतिः सा पार्थ राजसी ॥१८-३४॥

yayā tu dharmakāmārthān dhṛtyā dhārayate 'rjuna ।
prasaṅgena phalākāṅkṣī dhṛtiḥ sā pārtha rājasī ॥18-34॥

यया स्वप्नं भयं शोकं विषादं मदमेव च ।
न विमुञ्चति दुर्मेधा धृतिः सा पार्थ तामसी ॥१८-३५॥

yayā svapnaṃ bhayaṃ śokaṃ viṣādaṃ madam eva ca ।
na vimuñcati durmedhā dhṛtiḥ sā pārtha tāmasī ॥18-35॥

सुखं त्विदानीं त्रिविधं शृणु मे भरतर्षभ ।
अभ्यासाद्रमते यत्र दुःखान्तं च निगच्छति ॥१८-३६॥

sukhaṃ tv idānīṃ trividhaṃ śṛṇu me bharatarṣabha ।
abhyāsād ramate yatra duḥkhāntaṃ ca nigacchati ॥18-36॥

यत्तदग्रे विषमिव परिणामे ऽमृतोपमम् ।
तत्सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजम् ॥१८-३७॥

yat tadagre viṣam iva pariṇāme 'mṛtopamam ।
tat sukhaṃ sāttvikaṃ proktam ātmabuddhiprasādajam ॥18-37॥

विषयेन्द्रियसंयोगाद्यत्तदग्रे ऽमृतोपमम् ।
परिणामे विषमिव तत्सुखं राजसं स्मृतम् ॥१८-३८॥

viṣayendriyasaṃyogād yat tadagre 'mṛtopamam ।
pariṇāme viṣam iva tat sukhaṃ rājasaṃ smṛtam ॥18-38॥

यदग्रे चानुबन्धे च सुखं मोहनमात्मनः ।
निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतम् ॥१८-३९॥

yad agre cānubandhe ca sukhaṃ mohanam ātmanaḥ ।
nidrālasyapramādotthaṃ tat tāmasam udāhṛtam ॥18-39॥

न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः ।
सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः ॥१८-४०॥

na tad asti pṛthivyāṃ vā divi deveṣu vā punaḥ ।
sattvaṃ prakṛtijair muktaṃ yad ebhiḥ syāt tribhir guṇaiḥ ॥18-40॥

ब्राह्मणक्षत्रियविशां शूद्राणां च परंतप ।
कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः ॥१८-४१॥

brāhmaṇakṣatriyaviśāṃ śūdrāṇāṃ ca paraṃtapa ।
karmāṇi pravibhaktāni svabhāvaprabhavair guṇaiḥ ॥18-41॥

शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च ।
ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम् ॥१८-४२॥

śamo damas tapaḥ śaucaṃ kṣāntir ārjavam eva ca ।
jñānaṃ vijñānam āstikyaṃ brahmakarma svabhāvajam ॥18-42॥

शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम् ।
दानमीश्वरभावश्च क्षत्रकर्म स्वभावजम् ॥१८-४३॥

śauryaṃ tejo dhṛtir dākṣyaṃ yuddhe cāpy apalāyanam ।
dānam īśvarabhāvaś ca kṣatrakarma svabhāvajam ॥18-43॥

कृषिगोरक्ष्यवाणिज्यं वैश्यकर्म स्वभावजम् ।
परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम् ॥१८-४४॥

kṛṣigorakṣyavāṇijyaṃ vaiśyakarma svabhāvajam ।
paricaryātmakaṃ karma śūdrasyāpi svabhāvajam ॥18-44॥



स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः ।
स्वकर्मनिरतः सिद्धिं यथा विन्दति तच्छृणु ॥१८-४५॥

sve sve karmaṇy abhirataḥ saṃsiddhiṃ labhate naraḥ ।
svakarmanirataḥ siddhiṃ yathā vindati tac chṛṇu ॥18-45॥

यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् ।
स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ॥१८-४६॥

yataḥ pravṛttir bhūtānāṃ yena sarvam idaṃ tatam ।
svakarmaṇā tam abhyarcya siddhiṃ vindati mānavaḥ ॥18-46॥

श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ।
स्वभावनियतं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥१८-४७॥

śreyān svadharmo viguṇaḥ paradharmāt svanuṣṭhitāt ।
svabhāvaniyataṃ karma kurvan nāpnoti kilbiṣam ॥18-47॥

सहजं कर्म कौन्तेय सदोषमपि न त्यजेत् ।
सर्वारम्भा हि दोषेण धूमेनाग्निरिवावृताः ॥१८-४८॥

sahajaṃ karma kaunteya sadoṣam api na tyajet ।
sarvārambhā hi doṣeṇa dhūmenāgnir ivāvṛtāḥ ॥18-48॥

असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः ।
नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति ॥१८-४९॥

asaktabuddhiḥ sarvatra jitātmā vigataspṛhaḥ ।
naiṣkarmyasiddhiṃ paramāṃ saṃnyāsenādhigacchati ॥18-49॥

सिद्धिं प्राप्तो यथा ब्रह्म तथाप्नोति निबोध मे ।
समासेनैव कौन्तेय निष्ठा ज्ञानस्य या परा ॥१८-५०॥

siddhiṃ prāpto yathā brahma tathāpnoti nibodha me ।
samāsenaiva kaunteya niṣṭhā jñānasya yā parā ॥18-50॥

बुद्ध्या विशुद्धया युक्तो धृत्यात्मानं नियम्य च ।
शब्दादीन्विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च ॥१८-५१॥

buddhyā viśuddhayā yukto dhṛtyātmānaṃ niyamya ca ।
śabdādīn viṣayāṃs tyaktvā rāgadveṣau vyudasya ca ॥18-51॥

विविक्तसेवी लघ्वाशी यतवाक्कायमानसः ।
ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः ॥ १८-५२ ॥

viviktasevī laghvāśī yatavākkāyamānasaḥ |
dhyānayogaparo nityaṃ vairāgyaṃ samupāśritaḥ ||18-52||

अहंकारं बलं दर्पं कामं क्रोधं परिग्रहम् ।
विमुच्य निर्ममः शान्तो ब्रह्मभूयाय कल्पते ॥ १८-५३ ॥

ahaṃkāraṃ balaṃ darpaṃ kāmaṃ krodhaṃ parigraham |
vimucya nirmamaḥ śānto brahmabhūyāya kalpate ||18-53||

ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति ।
समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥ १८-५४ ॥

brahmabhūtaḥ prasannātmā na śocati na kāṅkṣati |
samaḥ sarveṣu bhūteṣu madbhaktiṃ labhate parām ||18-54||

भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः ।
ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् ॥ १८-५५ ॥

bhaktyā mām abhijānāti yāvān yaś cāsmi tattvataḥ |
tato māṃ tattvato jñātvā viśate tadanantaram ||18-55||

सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः ।
मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययम् ॥ १८-५६ ॥

sarvakarmāṇy api sadā kurvāṇo madvyapāśrayaḥ |
matprasādād avāpnoti śāśvataṃ padam avyayam ||18-56||

चेतसा सर्वकर्माणि मयि संन्यस्य मत्परः ।
बुद्धियोगमुपाश्रित्य मच्चित्तः सततं भव ॥ १८-५७ ॥

cetasā sarvakarmāṇi mayi saṃnyasya matparaḥ |
buddhiyogam upāśritya maccittaḥ satataṃ bhava ||18-57||

मच्चित्तः सर्वदुर्गाणि मत्प्रसादात्तरिष्यसि ।
अथ चेत्त्वमहंकारान्न श्रोष्यसि विनङ्क्ष्यसि ॥ १८-५८ ॥

maccittaḥ sarvadurgāṇi matprasādāt tariṣyasi |
atha cet tvam ahaṃkārān na śroṣyasi vinaṅkṣyasi ||18-58||



यदहंकारमाश्रित्य न योत्स्य इति मन्यसे ।
मिथ्यैष व्यवसायस्ते प्रकृतिस्त्वां नियोक्ष्यति ॥ १८-५९ ॥

yad ahaṃkāram āśritya na yotsya iti manyase |
mithyaiṣa vyavasāyas te prakṛtis tvāṃ niyokṣyati ||18-59||

स्वभावजेन कौन्तेय निबद्धः स्वेन कर्मणा ।
कर्तुं नेच्छसि यन्मोहात्करिष्यस्यवशो ऽपि तत् ॥ १८-६० ॥

svabhāvajena kaunteya nibaddhaḥ svena karmaṇā |
kartuṃ necchasi yan mohāt kariṣyasy avaśo 'pi tat ||18-60||

ईश्वरः सर्वभूतानां हृद्देशे ऽर्जुन तिष्ठति ।
भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया ॥ १८-६१ ॥

īśvaraḥ sarvabhūtānāṃ hṛddeśe 'rjuna tiṣṭhati |
bhrāmayan sarvabhūtāni yantrārūḍhāni māyayā ||18-61||

तमेव शरणं गच्छ सर्वभावेन भारत ।
तत्प्रसादात्परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम् ॥ १८-६२ ॥

tam eva śaraṇaṃ gaccha sarvabhāvena bhārata |
tatprasādāt parāṃ śāntiṃ sthānaṃ prāpsyasi śāśvatam ||18-62||

इति ते ज्ञानमाख्यातं गुह्याद्गुह्यतरं मया ।
विमृश्यैतदशेषेण यथेच्छसि तथा कुरु ॥ १८-६३ ॥

iti te jñānam ākhyātaṃ guhyād guhyataraṃ mayā |
vimṛśyaitad aśeṣeṇa yathecchasi tathā kuru ||18-63||

सर्वगुह्यतमं भूयः शृणु मे परमं वचः ।
इष्टो ऽसि मे दृढमिति ततो वक्ष्यामि ते हितम् ॥ १८-६४ ॥

sarvaguhyatamaṃ bhūyaḥ śṛṇu me paramaṃ vacaḥ |
iṣṭo 'si me dṛḍham iti tato vakṣyāmi te hitam ||18-64||

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मामेवैष्यसि सत्यं ते प्रतिजाने प्रियो ऽसि मे ॥ १८-६५ ॥

manmanā bhava madbhakto madyājī māṃ namaskuru |
mām evaiṣyasi satyaṃ te pratijāne priyo 'si me ||18-65||

सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज ।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥१८-६६॥

sarvadharmān parityajya mām ekaṃ śaraṇaṃ vraja |
ahaṃ tvā sarvapāpebhyo mokṣayiṣyāmi mā śucaḥ ||18-66||

इदं ते नातपस्काय नाभक्ताय कदा चन ।
न चाशुश्रूषवे वाच्यं न च मां यो ऽभ्यसूयति ॥१८-६७॥

idaṃ te nātapaskāya nābhaktāya kadā cana |
na cāśuśrūṣave vācyaṃ na ca māṃ yo 'bhyasūyati ||18-67||

य इदं परमं गुह्यं मद्भक्तेष्वभिधास्यति ।
भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयः ॥१८-६८॥

ya idaṃ paramaṃ guhyaṃ madbhakteṣv abhidhāsyati |
bhaktiṃ mayi parāṃ kṛtvā mām evaiṣyaty asaṃśayaḥ ||18-68||

न च तस्मान्मनुष्येषु कश्चिन्मे प्रियकृत्तमः ।
भविता न च मे तस्मादन्यः प्रियतरो भुवि ॥१८-६९॥

na ca tasmān manuṣyeṣu kaś cin me priyakṛttamaḥ |
bhavitā na ca me tasmād anyaḥ priyataro bhuvi ||18-69||

अध्येष्यते च य इमं धर्म्यं संवादमावयोः ।
ज्ञानयज्ञेन तेनाहमिष्टः स्यामिति मे मतिः ॥१८-७०॥

adhyeṣyate ca ya imaṃ dharmyaṃ saṃvādam āvayoḥ |
jñānayajñena tenāham iṣṭaḥ syām iti me matiḥ ||18-70||

श्रद्धावाननसूयश्च शृणुयादपि यो नरः ।
सो ऽपि मुक्तः शुभांल्लोकान्प्राप्नुयात्पुण्यकर्मणाम् ॥१८-७१॥

śraddhāvān anasūyaś ca śṛṇuyād api yo naraḥ |
so 'pi muktaḥ śubhāṃl lokān prāpnuyāt puṇyakarmaṇām ||18-71||

कच्चिदेतच्छ्रुतं पार्थ त्वयैकाग्रेण चेतसा ।
कच्चिदज्ञानसंमोहः प्रनष्टस्ते धनंजय ॥१८-७२॥

kaccid etac chrutaṃ pārtha tvayaikāgreṇa cetasā |
kaccid ajñānasaṃmohaḥ pranaṣṭas te dhanaṃjaya ||18-72||



अर्जुन उवाच ।
नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाच्युत ।
स्थितो ऽस्मि गतसंदेहः करिष्ये वचनं तव ॥१८-७३॥

arjuna uvāca |
nasṭo mohaḥ smṛtir labdhā tvatprasādān mayācyuta |
sthito 'smi gatasaṃdehaḥ kariṣye vacanaṃ tava ||18-73||

संजय उवाच ।
इत्यहं वासुदेवस्य पार्थस्य च महात्मनः ।
संवादमिममश्रौषमद्भुतं रोमहर्षणम् ॥१८-७४॥

saṃjaya uvāca |
ity ahaṃ vāsudevasya pārthasya ca mahātmanaḥ |
saṃvādam imam aśrauṣam adbhutaṃ romaharṣaṇam ||18-74||

व्यासप्रसादाच्छ्रुतवानेतद्गुह्यमहं परम् ।
योगं योगेश्वरात्कृष्णात्साक्षात्कथयतः स्वयम् ॥१८-७५॥

vyāsaprasādāc chrutavān etad guhyam ahaṃ param |
yogaṃ yogeśvarāt kṛṣṇāt sākṣāt kathayataḥ svayam ||18-75||

राजन्संस्मृत्य संस्मृत्य संवादमिममद्भुतम् ।
केशवार्जुनयोः पुण्यं हृष्यामि च मुहुर्मुहुः ॥१८-७६॥

rājan saṃsmṛtya saṃsmṛtya saṃvādam imam adbhutam |
keśavārjunayoḥ puṇyaṃ hṛṣyāmi ca muhur muhuḥ ||18-76||

तच्च संस्मृत्य संस्मृत्य रूपमत्यद्भुतं हरेः ।
विस्मयो मे महान्राजन्हृष्यामि च पुनः पुनः ॥१८-७७॥

tac ca saṃsmṛtya saṃsmṛtya rūpam atyadbhutaṃ hareḥ |
vismayo me mahān rājan hṛṣyāmi ca punaḥ punaḥ ||18-77||

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥१८-७८॥

yatra yogeśvaraḥ kṛṣṇo yatra pārtho dhanurdharaḥ |
tatra śrīr vijayo bhūtir dhruvā nītir matir mama ||18-78||

The Devanagari text was typeset in 24 point "Sanskrit 2003" on 32 point body.

http://www.sanskritweb.de U.Stiehl@t-online.de